

द्वा सुपर्णा

प्रो. रामजी उपाध्याय
एम. ए., डी. फिल्, डी. लिट्

अभिनव संस्करण : २००१

मूल्य : २५/

प्रकाशक :
भारतीय संस्कृति-संस्थानम्
महामनापुरी, वाराणसी ५
फोन : ३१७८९९

राजस्थान में वितरक :
आयुर्वेद-हिन्दी-संस्कृत-पुस्तक भण्डार
जयपुर

मुद्रक :
काबरा. आफसेट्स
वाराणसी

कवि-परिचयः

उत्तरप्रदेशस्य गङ्गासरयू-प्यायिते बलिया-मण्डलान्तर्गते उपसरयूनदं मलेजीति ग्रामे जन्मभूमी राजते लेखकस्य श्री रामजी उपाध्यायस्य। बाल्ये ग्रामशालायां मण्डल-विद्यालये च गुरुवर्यान् समाश्रित्य पश्चात् वाराणस्यां महामहोपाध्यायानां श्रीलक्ष्मणशास्त्रिणां तैलङ्गानां चरणचञ्चरीकः संस्कृत-महावृक्षस्य प्रथमकुसुमानि रसयते स्म। तदनु प्रयागविश्वविद्यालये डा० बाबूराम-सक्सेना-महोदयानां श्रीचरणेषु एम० ए०, डी० फिल्० उपाधि प्रथमस्यानीयमर्जितवान्।

उपाध्यायः १९४७ ख्रीष्ट-संवत्सरात् प्रभृति १९८० यावत् सागर-विश्वविद्यालये व्याख्यातृ-प्रवाचक-प्राध्यापक-कलासंकायाध्यक्षपदान्यधिष्ठितवान्। अध्यापनकाले १९६३ ख्रीष्टाब्दे स सागर-विश्वविद्यालयतो डी० लिट्० उपाधि 'प्राचीनभारतीयसाहित्यस्य सांस्कृतिक-भूमिका' इति विषयमधिकृत्य शोधप्रबन्ध-समर्पणेनावाप्तवान्।

उपाध्यायोऽयं तपसैव ब्राह्मणानां परं कल्याणमादर्शीकुर्वन् निरन्तरं लेखनाध्यापनाभ्यां भारतीय-संस्कृतेरतीतं तपःपूतं गौरवं सुप्रसादमुपायनीकर्तुं यतते। संस्कृतेन, हिन्दीभाषयाङ्गलभाषया च प्रणीतास्तस्य प्रमुखाः कृतयोऽधोविधाः सन्ति—

१. Sanskrit and Prakrit Mahakavyas, D. Phil. Thesis.

२. प्राचीन भारतीय साहित्य की सांस्कृतिक भूमिका, डी० लिट् शोधप्रबन्ध

३. मध्यकालीन संस्कृत नाटक उ० प्र० शासनेन सहस्रत्रयेण पुरस्कृतम्
म० प्र० शासनेन सार्धसहस्रेणपुरस्कृतम्

४. आधुनिक-संस्कृत-नाटक उ० प्र० शासनेन सहस्रत्रयेण पुरस्कृतम्

५. भारत की प्राचीन संस्कृति उ० प्र० शासनेन पुरस्कृतम्

६. महाकविः कालिदासः ,, ,, ,,

७. भारतस्य सांस्कृतिक-निधिः ,, ,, ,,

८. द्वा सुपर्णा ,, ,, ,,

९. संस्कृत साहित्य का आलोचनात्मक इतिहास (भागद्वयम्)

१०. भारत की संस्कृति-साधना

११. भारत की सामाजिक संस्कृति

१२. भारतीय संस्कृति का उत्थान

१३. विंश-शताब्दिकं संस्कृतनाटकम्

१४. दशरूपक-तत्त्वदर्शनम्

१५. दशरूपकं नान्दीटीका-सहितम्

१६. मध्यकालिकः संस्कृतनाटकालोकः

१७. पूर्वपथ (हिन्दी-नाटकम्)

१८. संस्कृत-निबन्धावली

विंशतिप्रायवर्षतः स सागरिकेति त्रैमासिकीं संस्कृतशोधपत्रिकां सम्पादयति। एतैर्ज्ञानविज्ञानकार्यजातविभावित-वैदुषीकः स १९७८ ई० वर्षे पुण्यपत्तने अखिल-भारतीय-प्राच्य परिषदः (All India Oriental Conference) साहित्य-विभागस्याध्यक्षपदाय निर्वाचितः।

———

काव्य-समीक्षणम्

द्वा सुपर्णेति नाम ऋग्वेदस्याधोलिखितमन्त्रानुसारेण निष्पन्नम्---

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभि चाकशीति ॥

१.१६४.२०

मन्त्रेऽस्मिन् द्वौ पक्षिणौ वर्णितौ, कस्यचिद् वृक्षस्योपरि समासीनौ सखायौ स्तः। तयोरेकः स्वादु फलमश्नाति अपरश्च केवलं दर्शनेनात्मानं कृतकृत्यं मन्यते।

अत्र व्यञ्जनया प्रथमः पक्षी महाभारतस्य भागवतस्य वा कृष्णो लोकसंग्रहं विधातुं लोकव्यापारेषु दिव्यशक्त्यात्मानं विनियोजयति स्म। अयमेव तस्य कर्मयोगो येन स्वकर्मणा स लोकेभ्यो वैभवं प्रददाति। वैभवं प्रदातुं स एव समर्थः स्यात्, यः स्वयं वैभवराशिं संचिनोति। एतत् सर्वं कृष्णस्य स्वभावतः सिद्धमासीत् योगेश्वरत्वात्।

सुदामा अपरः पक्षी ब्रह्मतेजसा लोकं सन्धारयति। तदर्थं स आध्यात्मिकं प्रकाशं वितरति। सुदामा लौकिकवैभवमुपेक्षते। कृष्णसुदामानावधिकृत्य विरचितेयमाख्यायिका द्वा सुपर्णेति ख्याता।

कृष्णः सुदाम्नोऽकिञ्चनत्वमपाकर्तुमेव समुद्यतः किं किं न करोतीति प्रगुणं विशदीकृतमस्मिन् काव्ये। सुदामापि सर्वात्मना कृष्णस्य सर्वानुपायान् विफलीचकारेति सङ्घर्षः कश्चिदभिनवो वस्तुविस्तरः।

कथासारः

ग्रामीणः सुदामा कुलपतेः सान्दीपनेराश्रमेऽध्येतुमुज्जयिनीं जगाम। तत्र कृष्णबलरामौ तस्य सहाध्यायिनौ बभूवतुः। एकदा कृष्णसुदामानौ गुरुकुलार्थमिन्धनमाहर्तुं शिप्रायाः परं पारमगच्छताम्। तत्र झञ्झावातेन सह पर्जन्यो भृशमवर्षद्। रात्रिः समायाता। वन्यमार्गा वृक्षाणां पतनेन विलुप्ता आसन्। तत्रैव

कृष्ण-सुदामानौ कस्यचिन्महावृक्षस्य शरणमाश्रितवन्तौ। एकदा भोजनकाले सुदामा स्वभोजनात् किञ्चिदपि कृष्णाय नाददात्। तेन विचारितम्—कृष्णाय यः किञ्चिदपि ददाति तस्मै कृष्णो विपुलं प्रतिददाति। विषमपि ददती पूतना तेनामरपदं प्रापिता। अहं धनिको भवितुं नेच्छामि। अतः कृष्णाय कणमपि न दास्यामि।

योगेश्वरः कृष्णो योगबलेनाजानात्यन्मम क्षुधानिवारणार्थं सुदामा स्वदारिद्रयमपि त्यक्तुं नोत्सहते। अहं तस्य दारिद्रयं दूरीकरिष्याम्येव।

विद्याध्ययनान्तरं कृष्णादीनां समावर्तनमभवत्। ते देशपर्यटनं कृत्वा गृहं गताः। कालान्तरे कृष्णेन निमन्त्रितः सुदामा मथुरानगरे राजमहोत्सवं द्रष्टुं समागतः ब्रह्मोद्य-भाग्बभूव। बहून् स्नातकान् पराजित्य सुदामा राज्ञोऽपि प्रशंसास्पदं बभूव। तत्र राजपुरोहितस्य गर्गाचार्यस्य कन्या तस्य प्रज्ञानेन हृतहृदया तं वररूपेण प्राप्तुमैच्छत्। कृष्णस्य माध्यस्थ्येन तयोर्विवाहः परिणतः। विवाहमुपलक्ष्य वधूपक्षेण राज्ञा चोपहृतानि बहूनि धनानि सुदामा नो स्वीचकार।

सुदामगृहं समागता कौमुदी ग्रामीणानां दुर्दशां दृष्ट्वा भृशं दुःख्यति। ग्रामं सुखयितुं सा कन्यकानां कृते पाठशालां समचालयत्। वृद्धानां युवकानां च कृते प्रौढशाला उदघाटयत्, वधूनां कृते संगीत-शिल्पादीनि प्राशिक्षयत च। कौमुद्याः प्रोत्साहनेन ग्रामीणानामावश्यकवस्तूनि वस्त्रादीनि तत्रैव निर्मीयन्ते स्म। तस्या आदर्शमुररीकृत्य नार्यः स्वर्णाभरणानि परित्यज्य पुष्पादीनामलंकारान् धारयन्ति स्म। एवं स ग्राम आत्मन्येव पूर्णतामयात्।

शीघ्रमेव तस्मिन् ग्रामे सर्वं भव्यतरं ववृधे। कौमुद्या योजनाभिस्तीर्थीकृतः सुदामग्रामः तस्य जनपदस्यादर्शोऽभ्युदयकेन्द्रं च बभूव।

आचार्यदिशानुसारेण सुदामा स्वग्रामस्य समीपे वनप्रदेशे आश्रमं संस्थापयति स्म। शनैःशनैः आचार्यकुलं चतुर्दिशं विख्यातं बभूव। देशान्तरेभ्योऽपि विद्यार्थिनस्तत्र पठितुं समागच्छन्। तस्मिन्नाश्रमे कश्चिदव्यक्त एवोत्थान-जागरण-बोधमयः प्रभावः प्रतिभासते स्म।

सुदामा स्वकीये ग्रामे यदा कदा समागत्य तत्र परिवर्त्तनं परीक्ष्य विस्मयते स्म। तस्योपदेशेन तत्र पुरुषा यथापदं धर्मार्थकामादिषु पुरुषार्थेषु व्यापृता महा-

यज्ञशालिनो बभूवुः। ग्रामवासिनां पारस्परिक-सौहार्देन साहाय्येन समाश्रयेण च स ग्रामः कुटुम्बमिवाशोभत।

कौमुदी ग्रामाभ्युदय-योजनां देशव्यापिनीं विधातुकामा कृष्णस्य साह्यमपेक्षते स्म। पितृगृहात् प्रस्थाने कृष्णः साश्रु तां सन्दिदेश—'यदि नाम स्वकार्येषु धनाभावबाधापतेत्तर्हि निःसंशयमहं त्वया स्वकीये ग्रामे आमन्त्रयितव्यः। निमन्त्रणाय सोपायनः सुदामा प्रेषणीयः। शेषं सर्वं कार्यजातमहं साधयिष्ये' इति। 'ग्रामेऽस्माकं कृष्णः शिष्टाभ्यागतः समायातु' इति स त्वरमाणा सा एकदा सुदामानं न्यवेदयत्—ग्रामस्याभ्युदयदर्शनाय कृष्णो भवता निमन्त्रणीयः। सोऽत्रागत्य ग्रामोत्कर्षं दृष्ट्वास्माकं योजनानां प्रसाराय किञ्चित् कुर्यादिति। कौमुद्याः प्रेरणयानिच्छन्नपि सुदामा चिपिटमुपायनीकृत्य कृष्णनगरीं द्वारकां प्रति प्रातिष्ठत।

द्वारकायां द्वारपालः सुदामागमनं कृष्णायासूचयत्। स्वमित्रस्यागमनेन, प्रहृष्टः कृष्णः प्रतिहारमागम्य सुदाम्नः स्वागतेनात्मानं बहु मेने। कृष्णस्य प्रेमाश्रुजलैः सुदामपादौ सम्मार्जितौ।

सुदाम्नः कृशदशां विलोक्य सशङ्कमनसा कृष्णस्तं कौमुदी-वृत्तान्तमपृच्छत्। कौमुद्या योजनाभिः स्वग्रामस्योन्नतिं सुदामा कृष्णायावर्णयत्, ग्रामदर्शनाय तमामन्त्रयच्च। भारतीयग्रामाणामभ्युदय-विषये सदैव चिन्तापरायणः कृष्णः किमपि नवीनं सुदामग्रामे निरीक्षितुं निमन्त्रणं स्वीचकार। सुदाम्नस्तत्र विश्रामावधौ कृष्णः कौमुद्या प्रेषितं चिपिटं स्वयमेवार्थयित्वास्वदत।

रुक्मिण्या सह कृष्णः सुदामग्रामं समागच्छत्। तत्र ग्रामाभ्युदयं साक्षान्निरीक्ष्य कृष्णः कौमुदी-योजनां देशव्यापिनीं कर्तुं महाधनराशिं राजकोशादर्पयति स्म।

मूलकथा

'द्वा सुपर्णा' कथा मूलतः पुराणेभ्यः संगृहीता। पुराणानुसारेण सान्दीपनिः काशीवासी बभूव। स ज्ञान-विज्ञान-वित्तमः उज्जयिन्यां गत ऋषिः सन्नुवास।

श्रीमद्भागवतानुसारेण सुदामा तु कुचेल एव। स उज्जयिन्यां कृष्णस्य सतीर्थ्यो बभूव। इन्धनसंग्रहवृत्ते स कृष्णाय किञ्चिदपि नादात्। गुरुस्याश्रमे

ऽकिञ्चन एव स सात्त्विकजीवनमयापयत् । तस्याः पत्नी कौटुम्बिक-दारिद्र्येण निर्विण्णा सती सुदामानं कृष्णसमीपं प्रैषयत् । कृष्णायोपहर्तुं सा चिपिटस्य चतुर्मुष्टीः र्पयति स्म । द्वारकायां कृष्णेन सुदाम्न उच्चकोटिकं स्वागतं सम्पादितम् । तत्र सुदामा किंचिदपि नायाचत । कृष्णोऽपि तस्मै किञ्चिदपि नादात् । कृष्णस्तु सादरं चिपिटस्य मुष्टिमेकामश्नाति स्म ।

द्वारकातो गृहागमनकाले मार्गे सुदामा समाश्वस्त एव सुप्रसन्न आसीत् । यदि नाम कृष्णो मह्यं धनमदास्यत् तर्हि धनिक एवाहं स्वतपःसाधनाभ्यां विरतोऽभविष्यम्, इति स विचारयति स्म । स्वग्रामे प्राप्तः स कृष्णप्रत्तं विपुलं धनराशिं राजोचितैश्वर्यं च स्वकीयमपश्यत् ।

कथायाः परिवर्तनं परिवर्धनञ्च

भागवतानुसारेण सुदामा स्वभोजनस्य तुच्छतां परीक्ष्य लज्जया वा कार्पण्येन वा कृष्णाय किञ्चिदपि नाददात् । अत्र विसंवादो जायते 'सु + दा √ मनिन्' इति व्याकृतः सुदामा यथानाम दानशीलः स्यात् । अतएव कृष्णाय भोजनं न दत्तवानित्यत्र कारणं तस्य ब्रह्मनिष्ठा एव साधु प्रकल्पितम् । तदनु कृष्णः तं धनीकर्तुं प्रतिजानीते इति नव्या काचिद् विचारणा । अतः परं महाकालमन्दिरे कृष्णादीनां समावर्तन-संस्कारः, तेषां देशदर्शनार्थं पर्यटनं, मथुरायां पुनः समागमनं, स्नातकं सुदामानं सुखीकर्तुं कृष्णस्य धनदान-प्रस्तावस्य सुदाम्ना प्रत्याख्यानमित्येते वृत्तांशा नवीना एव ।

मथुरायां ब्रह्मोद्यं, तत्रैव सुदाम्नो ब्रह्मज्ञानेन विमुग्धया कौमुद्या सह कृष्ण-योजनानुसारेण विवाहः, यौतकरूपेण प्रत्तस्य विपुलधनराशेः सुदाम्ना परित्याग इति कथांशाः सुतरां नव्यतां वहन्ति ।

कौमुदी सुदाम्नोर्ग्रामयात्रोत्तरभागस्य पूर्वपीठिकैव संयोजिता । ग्रामाभ्युदयार्थं कौमुद्या उद्योगः सुदाम्नश्चाश्रम-व्यवस्थेति कथांशा अभिनवामेव रमणीयता-मनुमन्दधते ।

कौमुदी न स्वार्थायापितु लोकाभ्युदयार्थाय कृष्णं निमन्त्रयति । कृष्णश्च राष्ट्राभ्युदय-योजनानां प्रसारार्थं धनं ददातीति पुराकथा संस्कृतेव शोभते ।

चरित्र-चित्रणम्

सान्दीपनिः

सान्दीपनिः प्रसिद्ध आचार्योऽभवत्। भारतीयार्ष-संस्कृतौ यत्किञ्चिदुत्तमं प्रकृष्टं च वर्तते, तत्सर्वं सान्दीपनौ समुदितमेव। वसुधैव कुटुम्बकमिति तस्य जीवनविधौ चरितार्थं भवति। स शिष्यान् प्रबोधयति—'न केवल स्वग्रामो, जनपदो, देशो वा स्वकीय इति मन्तव्यम्, अपि तु सर्वोऽयं भूलोको युष्माकं भोगाय, ज्ञानाय, रक्षणाय, च वर्तते, युष्मत्संरक्षणं संवर्धनं चार्हति।' शिष्याणां लोककल्याण-वृत्ति-संवर्धनं तस्य महती चिन्तासीत्।

आचार्यः शिष्यान् पुत्रवदमन्यत। कृष्ण-सुदाम्नोर्वनादनागमनेन चिन्तितः स रात्रिकाले तयोरन्वेषणाय शिप्रातटमगच्छत्। तत्रानिशं जाग्रदेव तस्मिन् वनोद्देशे योगविधिना मैत्रीभावं सम्प्रसार्य हिंस्रजन्तुभ्यः कृष्णसुदामानौ समरक्षत्। सान्दीपनिः परम्परामनुसृत्य स्वकीयस्नातकान् मधुपर्क-विधिना सभाजयति स्म।

आचार्य-सान्दीपनेर्माहात्म्यं तस्य शिष्याणां गौरवेण प्रस्फुटितमेव।

सुदामा

बाल्येऽपि कथानायकः सुदामा ब्रह्मर्षिर्भवितुमियेष। स ब्रह्मार्पणमेवात्मनोऽद्वितीयं स्वार्थं मन्यमानः साफल्यमभजत। तदर्थं तस्य दूरदर्शिता प्रसिद्धैव। स्वभोजनात् स कृष्णाय किञ्चिदपि न ददाति, विचारयति च कृष्णाय यः किञ्चिदपि ददाति स कृष्णेन धनीक्रियते। धनं तु ब्रह्मविनाशाय भवति। अतः कृष्णाय किञ्चिदपि न देयमिति।

सुदामाचार्याज्ञापालनाय स्वकीयं नैष्ठिकब्रह्मचर्यव्रतस्य निश्चयं त्यजति। स सर्वथा ग्रामोपासको वर्तते। विवाहानन्तरं स समृद्धमपि श्वशुर-धनं न स्वीकरोति, स्पष्टं प्रतिवदति च—नाहं ग्रामरीतिं, कुलरीतिं वा परित्यज्य नागररीतिं ग्रहीतुकामः इति।

सुदाम्नो दृढविचारस्तु प्रकाशित एव। स एव कृष्णेन साधु पर्यालोचितः —

नायं सुदामा तर्केण पराजितो भविष्यति, अस्माकं मतं वा स्वापतेयं वा स्वीकरिष्यतीति। अनेन सुदाम्नोऽपरिग्रहः सत्याग्रहश्च प्रतिफलतः।

सुदामा नागरिक-सभ्यतायां कष्टं समीक्षते। तस्य मतेन नगरधूलिर्महामुनीनामपि साधुत्वमपाकरोति।

कृष्णो मम मित्रमपि सदैव मम हितचिन्तको नास्तीति तस्याभिमतमासीत्। यदा-कदा स कृष्णस्याग्रहं न मन्यते, विशेषतः आध्यात्मिकवृत्तिपरेषु जीवनादर्शेषु कुत्रापि स कृष्णेन सहापोषं नैव सहते।

सुदाम्नो वचनेषु तस्य चरित्रं प्रतिफलति। तथाहि—

न हि कश्चिद् दरिद्रो धनिकादवरः।

आजीवनं नित्यमेव ब्रह्मविद्याया निःशुल्कमध्यापनं करिष्यामि।

परिग्रहो हि नाम मानवं सत्पथात् दूरमपसारयति।

नाहं गृह्णामि काकिणीमपि श्वशुरात्।

उच्चेषु नियोगेषु सिद्ध्यर्थमपरिग्रहवृत्तेः तपसः साधनायाश्चापेक्षा भवति।

गृहाश्रमेण मया भारतस्य सर्वेषां गृहस्थानां चारित्रिकाभ्युत्थानाय प्रयतनीयम्।

अहं तु सर्वथा धनपरित्यागमात्मकल्याणाय मन्ये।

अहं खलु स्वयं सेवकः सुदामा।

सुदामविषयकाणि कृष्णवचनानि तस्य चरित्रं विशदयन्ति। तथाहि

भवान् गार्हस्थ्येऽपि सकलानि ऐन्द्रियकसुखानि विहाय तपश्चरति।

कौमुदी सुदाम-विषये स्वगतं वक्ति—सुदाम्नो भारतीय-धर्म-संस्कृति-विषयकं व्याख्यानं चारुतरं वर्तते। व्याख्यानेषु तस्यान्तःकरणं समुच्छ्रितमेव।

पेशलमेव सुदाम्नः कृतित्वम्। तस्य ब्रह्मशक्तिः सर्वेषु पराक्रमेषु प्रतिफलति। स्वकीय आश्रमेऽसंख्यानां ब्रह्मचारिणामध्ययनाध्यापनयोः तेषां सम्भरणस्य व्यक्तित्व-विकासस्य च कृतेऽनिशं तस्य महान् परिश्रमः प्रशस्य एव।

पत्न्या कौमुद्या सह तस्य सामञ्जस्यमासीदेव। स कौमुदीं प्रत्यवदत्—'यत्किञ्चित् करणीयं साहाय्यपरं मम विद्येत तदवश्यमेव त्वया विज्ञाप्योऽस्मि। सर्वं तत् साधयिष्ये येन तव समारम्भाः सफला भवन्तु' इति।

कृष्णः

महाभारत-पुराणादिषु प्रख्याततमो लीलावतारः भगवान् कृष्णः केनचिद-भिनवेनातिशयेनालङ्कृत एव चित्रितोऽस्मिन् सन्दर्भे। स सुदाम्नो दारिद्र्यमपाकर्तुं व्रतं धारयति—न मे मित्रं दारिद्र्यं वोढुमर्हतीति। स्नातको भूत्वा भारतस्य विविधभागेषु प्रतिष्ठितानां राज्ञां सङ्घं स्थापयितुकामः स तेषां परस्परं सौहार्दं स्थापयति। स तु भारतभाग्यविधातेति सम्मानितः।

कृष्णस्य भाविदर्शनं तु सविशेषमेव वर्तते। स सुदाम्नो मनोवृत्तिमजानात् यत् स ग्राम्यवेशे एव विवाहार्थं मथुरामागमिष्यति। इमां स्थितिं विचार्य सुदाम्नः कृते नागरोचित-परिधानानि नीत्वा वसुकामग्रामे तममिलत् साग्रहञ्च स्वकीयै-र्वस्त्राभूषणैश्च तं पर्यभूषयत्। कृष्णयोजनानुसारेण तस्मात् स्थानात् शकटिकां विहाय सुदामा राजरथारूढो मथुरां प्रति प्राचलत्।

अन्येषां वचनैः कृष्णस्य चरित्रं प्रकाशितमेव। कौमुदी कृष्णं विशेषयति—

सकललोकसंरक्षणव्यापृतः (कृष्णः)। सुदामा कृष्णं समीक्षते—'कृष्णस्य माहात्म्यमुपकारशीलत्वं च मामृणीकरोति' इति। 'सन्तः स्वयं परहिते विहिता-भियोगाः' इति च।

कविमतेन कृष्णस्तु सकलवैषम्य-निवारकः, समुपाय-चिन्तनेऽपरो बृहस्पतिरेव।

कृष्णो भारतीय गणराज्यस्य श्रेष्ठ उन्नायको वर्तते। कौमुद्या योजनाभिर-खिलं भारतं समुदयं यथा लभेत तथा स सम्यग् यतते। स सङ्कल्पते—कौमुद्या योजनाभिः सर्वेषां गणराज्यस्थितग्रामाणामभ्युदयो भूयादिति।

कृष्ण-सुदाम्नोर्मैत्रीभावस्तु शाश्वतमादर्शमुपस्थापयति सद्वृत्तानां लोकानां कृते। तस्य मैत्रीभावस्य परा काष्ठा सुदाम्नः स्वागत-दृश्ये विलसति।

कौमुदी

कौमुदी आख्यायिकाया नायिका प्रभवति। सा वृन्दावन-गुरुकुलस्य स्नातिका-स्ति। गुणानुराग एव तां सुदामानं प्रति समाकर्षति। सा सुदाम्नो गुणपूगान् मनसि धारयति—महानयं सुदामा। सर्वेषां हृदि पदमनेन विहितमिति।

कौमुद्याः प्रतिभा वैषम्यं शमयितुमलम्। सुदाम्नो दीनता तां न विचालयति। दीनता नाम सुदाम्नोऽचिरसङ्गिनीति सा विचारयति। विवाहानन्तरमपि पत्युः परिग्रहं श्रुत्वा पूर्वतः खिन्नापि सा कृष्णमन्त्रणया स्मितमुखी प्रतिजानीते— 'साधयिष्येऽहं सौकर्येण यद् भवता नियोजितम्'।

कौमुद्या जीवन-दर्शने सविशेषो विकासः समयानुसारेण प्रवर्तते। मूलतः सा स्वभावोचितं सविलासं स्वकीयं गार्हपत्यं शोभनमियेष। एतदेव सा नगर-परिक्रमकाले यमुनां याचते कथयति च—'केवलमिदमेव तव प्रसादेन मे सिद्धं भवतु यन्मे हृदयेशः स्वदैन्यवृत्तिं विजहातु। स धनधान्यसम्पन्नो भूत्वा गृहस्थाश्रमोचितान् महायज्ञान् सम्पादयतु' इति। ग्रामीणा अपि तस्या विषये चिन्तयन्ति— कथमियं मथुरोचितविलास-प्रवणा युवतिर्ग्रामे जीवनं यापयिष्यतीति। किन्तु सुदामग्राम-यात्राकाले जनपदस्य सौन्दर्यं निरीक्ष्य सा स्वगतं वक्ति—मम जीवनं सुदाम्नो ग्रामे ससुखं भविष्यतीति। ग्रामे समागता अचिरमेव स्वसुख-निरभिलाषैव सान्येषां दुःखानां दूरीकरणे व्यापृता सती सुदाम्नो दारिद्र्यं क्लेशदं न मन्यते। सुदामापि कौमुदी-विषयकं परिवर्तनं निदर्शयति—यमुना मम प्रार्थनानुसारेण कौमुद्याश्चित्तवृत्तिं सर्वथा परिवर्तितवती, अन्यथा कथमियं मथुराया भोगविलसान्वेषिणी रमणी अधुना ग्रामबालासु सोत्साहं रमते।

कृष्णः कौमुदीगुणान् परिचाययति—

बुद्धिमती कौमुदी तु स्त्रीरत्नमेव सौन्दर्येण, शीलेन, शिल्पादि-ज्ञानेन च गार्हस्थ्यधर्म-निर्वाहे स्वभावतः भवतः सहाया भविष्यति। सा सर्वथा सुलक्षणेति।

लेखकेन सम्यक् पर्यालोचितम्—कौमुद्या अनुभावस्य किमप्यपूर्वं वैशिष्ट्यमासीदिति, 'न केवलं व्याख्यानं ददाति, अपि तु स्वविचारानुरूपां जीवन-पद्धतिं स्वीकरोतीति च।

सुदाम्नोऽपि ग्रामाभ्युदय-योजनाया बहुतरं प्रेरणास्रोतः कौमुदी एव।

कौमुदी न केवलं स्वग्रामस्याभ्युदयेन तुष्यति। 'सर्वे सुखिनः सन्तु' 'सर्वे भद्राणि पश्यन्तु' इति सम्प्रधार्य सा कृष्णस्य साह्यमपेक्षते। तदर्थं यतते प्राप्नोति च।

'काचिदनुत्तमैव कार्यशक्तिः कौमुद्याः समुदिता वर्तते' इति तस्याः कृतित्वेन स्पष्टमेव। न केवलं भौतिकमपितु चारित्रिकमपि उत्थानं ग्रामीणजनानां तया

संसाधितम् । कृष्णानुसारेण लक्ष्मीरूपेण वा सरस्वतीरूपेण वा कौमुदी ग्रामे समागता ।

शैली

द्वा सुपर्णेति काव्ये शैली प्रसादगुणरमणीया वर्तते । सुसरलात्र रचना-पद्धतिः सिद्धाचार्यं कालिदासमेवादर्शीकृत्य विलसति । मनोज्ञपद-विन्यासः, सुबोधसमासः, परितः परिदृश्यमानोपमान-परिपोषितालङ्कारच्छटा इत्येते गद्यशैलीमत्र विशेषयन्ति ।[1] लघुवाक्यानि भावनिर्भराणि स्वत एवार्थं प्रकटयन्ति ।

भावदृष्ट्या लेखकः परमौदार्त्यं पाठकानां यथा स्यात्तथा वितनुते काव्यसरणिम् । कविर्मानवलोकाय चिरन्तनं वा सनातनं वा स्वाभाविकं वा सुमधुरसाह्यं परस्परोपकार-वर्त्तनं च दातुकामोऽखिलचराचरजगति सौम्यं सद्भावं पश्यति निदर्शयति च । पुरातनकवीनां शृङ्गारित-वर्णनं लोकानां सम्यग्विकासाय न प्रवर्तत इति मनसिकृत्य लेखकस्तस्य स्थाने आत्मविसर्गचित्रणमेवोत्तोलयति तथैव मानवजीवनस्य परमोद्देश्यं च प्रतिपादयति । आख्यायिकाया आरम्भिक-वाक्यराशिस्तत्रोदाहरणम् ।

आख्यायिकायां प्रकरण-वक्रता सम्यग्विलसति । तथाहि

'एतेषां सर्वेषां लोकानां कल्याणं विदधतो यूयं तेभ्यो लोकेभ्यः परमानन्दस्य, अभ्युदयस्य च प्राप्तिं कुरुत' । अनेन वाक्येन ग्रन्थस्याद्यन्तं भावराशिरुन्नीयते ।

कृष्णः कथयति—'तस्य (सुदाम्नः) दारिद्र्यं तु मयापहरणीयमेव' इति । अनेन वाक्येन कृष्णस्य कार्यजातं साकल्येन समाक्षिप्यते ।'[2]

---

१. ध्वन्यालोकानुसारेण—
गद्यस्य विकटबन्धाश्रयेण छायावत्त्वात् । ३.८
एतदधिकृत्याभिनवगुप्तः समीक्षते—किन्तु नैतन्मतं साधु, समीचीनं शाश्वतं च । पुरापि बहवो गद्यकवयो दीर्घ-समासां पद-संघटनां परिहृतवन्तः ।

२. यत्र नियन्त्रणोत्साह-परिस्पन्दोपशोभिनी ।
प्रवृत्तिर्व्यवहर्तॄणां स्वाशयोल्लेखशालिनी ॥
अप्यामूलादनाशंक्य समुत्थाने मनोरथे ।
काप्युन्मीलति निःसीमा सा प्रबन्धांशवक्रता ॥ वक्रोक्तिजीविते ४. १-२

पौराणिककथायाः सम्यक् प्रतिसंस्कारो द्वा सुपर्णाख्याने निष्पन्नः एव। अनेन प्रतिसंस्कारेण नवकथाया रमणीयता संवर्धते। तत्रासदुत्पाद्य-प्रकरण-वक्रता, अन्यथा-सम्पाद्य-वक्रता च विलसतः।[1]

कौमुदीचरिताख्यानं सर्वांशतः प्रकरण-वक्रतामधिकरोति। तस्या ग्रामाभ्युदय-योजनाया लोकाभ्युदययोजना-रूपेण परिणतिर्वरीवर्ति। इमां वक्रतां कुन्तकः परिभाषते—

यत्रैकफलसम्पत्ति-समुद्युक्तोऽपि नायकः।
फलान्तरेष्वनन्तेषु तत्तुल्यप्रतिपत्तिषु॥
धत्ते निमित्ततां स्फारयशः सम्भारभाजनम्।
स्वमाहात्म्य-चमत्कारात् सा पराप्यस्य वक्रता॥ ४. २२-२३

आख्यायिकायां वीरो रसोऽङ्गी वर्तते। तत्र दयावीरस्य दानवीरस्य च सामञ्जस्यं प्रवर्तते। आत्मविसर्गवृत्त्या सुदामा कौमुदी च लोकहिताय यदाचरतः, तत्सर्वं विनय-सत्त्वाध्यवसाय-रूपान् विभावान् पदे-पदे प्रकटयति।

काव्येऽस्मिन् सात्त्वती वृत्तिः प्रचुरायते। तत्र सात्त्वतो गुणो नाम मानसो व्यापारः। भरतानुसारेण—

या सात्त्वतेनेह गुणेन युक्ता न्यायेन वृत्तेन समन्विता च।
हर्षोत्कटा संहृतशोकभावा सा सात्त्वती नाम भवेत्तु वृत्तिः।

धनञ्जयानुसारेण

विशोका सात्त्वती सत्त्वशौर्यत्यागदयार्जवैः।
काव्ये सत्त्वशौर्य-त्यागदयार्जवा-दीनां बाहुल्यं प्रत्यक्षमेव।

———

१. इतिवृत्तप्रयुक्तेऽपि कथावैचित्र्यवर्त्मनि।
उत्पाद्यलवलावण्यादन्या लसति वक्रता॥ वक्रोक्तिजीविते ४.३

द्वा सुपर्णा

पूर्वभागः

(१)

ग्रामात् ग्रामं पर्यटन् विद्यार्थी सुदामा बहुषु वनेषु विचरन् शतक्रोशयात्रां पद्भ्यां समाप्योज्जयिनीमुपागमत्। तत्र स प्रत्युद्यातेन शीतलमन्दसुगन्धवायुना निषेवितं स्नेहपरायण-मृगाणां समुदाचारैश्च प्रशान्तमाश्रमपदं दूरत एवाभिज्ञात-वान्। आश्रमपरिसरेऽतिथीनां कृते तत्र सुखशाद्वलैः आसनम्, रमणीयलतापुष्पवृष्टया स्नानम्, नानादिग्देशात् समागत-पक्षिणां सूनृताभिश्च स्वागतं सम्पादितम्।

तत्र रमणीयवनभूभागे होमधूमः पताका इवाचार्यवसतिं विज्ञापयति स्म। वन्योपहारैः सुदामाविलम्बमेव नवतामन्व-भवत्। तस्मिन् पावनप्रदेशे न केवलं शरीरेण, मनसापि स निर्मलतां जगाम।

आश्रमस्य समीपं मृगैरनुयाताः, वनान्तरादुपावृत्ताः, समित्कुशफलहारिणश्च ब्रह्मचारिणः प्रथमं सुदामानमपश्यन्। तस्य रूपं शीलं वृत्तिं च निरीक्ष्य 'स्ववर्गीयोऽयम्' इति ते विभावयन्ति स्म। ते झटिति एव तस्य कमण्डलपेटिकादिकं

गृहीत्वा तं मुक्तभारं कृत्वा मार्गश्रमं विनोदयितं द्वारस्थपर्णशालां नीतवन्तः । स्नानाचमनयोरनन्तरं सोऽभ्यागताचारानुरूपं मुनिभोजनं फलमूलादिकं गृहीतवान् ।

सायंकाले सब्रह्मचारिभिः सुदामा सान्दीपनेः महर्षेः सार्वजनिकप्रवचनकक्षायां यथाविधानं प्रथमं समुपस्थापितः। महर्षेः पुरतो प्रणत एव विनम्रः सुदामा निवेदितवान्—ब्रह्मचर्यमागामिति। महर्षिः पितृभावेनावदत्—को नामासीति ? सुदामास्मि काश्यपगोत्रोत्पन्नः ब्रह्मकामः। आचार्यः तस्य हस्तं गृह्णाति स्म। सोऽभाषत—इन्द्रस्य ब्रह्मचारी असि। अग्निः आचार्यः तव। अहं तवाचार्यः। स सुदामानं ताभ्यां देवताभ्यां परिददाति स्म। स तं भूतेभ्यः, प्रजापतये, सवित्रे च परिददाति स्म। पुनरवदत्—एते वै श्रेष्ठे वर्षिष्ठे देवते। एताभ्यामेवैनं श्रेष्ठाभ्यां वर्षिष्ठाभ्यां देवताभ्यां परिददाति स्म। पश्चात् स विद्यार्थिनमद्भ्यः, ओषधीभ्यः, द्यावापृथिवीभ्याम्, विश्वेभ्यो भूतेभ्यश्च परिददाति स्म।

आचार्यः पुनरभाषत—'ब्रह्मचारी असि। अपोऽशानेत्यमृतं वा। कर्म कुरु। वीर्यं वै कर्म। वीर्यं कुरु। समिधमाधेहि। समित्स्वात्मानं तेजसा ब्रह्मवर्चसेन। मा सुषुप्थाः। मा मृथाः। तदेनमुभयतोऽमृतेन परिगृह्णाति स्म। अथैनं सावित्रीमन्वाह।' अनेन विधिना सुदाम्नो ज्ञानशरीरस्य जननाय संवर्धनाय च सान्दीपनेः पितृत्वं समुपकल्पितम्।

तस्मिन्नेव दिने मथुरातः कृष्णबलरामौ सान्दीपनेः संस्थाने समागतौ। तौ उभौ क्षत्रकामौ ब्रह्मकामौ च वभूवतुः। तयोरुपनयनं महर्षिणा सुदाम्नः अनन्तरं कृतम्।

आचार्यः नवान् ब्रह्मचारिणः समादिष्टवान्—'यूयमेकस्मिन् दिने समुपनीताः, सब्रह्मचारिणः। युष्माभिः सदैव सह वर्तितव्यं सर्वेषु नियोजनीयेषु। युष्मासु सुदाम्नो ज्येष्ठत्वं विहितं मया, तस्य ब्रह्मकामत्वात्' इति।

आचार्यः प्रवचनं प्रारब्धवान्—ओ३म्। सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्वि नावधीतमस्तु। मा विद्विषावहै।

संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्। उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत।

कथं व्यवहर्तव्यम्—'ईश्वरः सर्वत्र सदैव वर्तते' इति मनसि कृत्वा सर्वेषां चराचराणां कल्याणं विधातव्यम्। स भगवान् सर्वेषां पिता। भगवान् सर्वेषामात्मा एव। कस्यचित् प्राणिनोऽनादरस्तु भगवतोऽनादर एव। सर्वैः प्राणिभिः सह तादात्म्यमनुभवनीयम्। युष्माकं मनसि कदापि सफलत्वे हर्षः, विफलत्वे विषादो वा मा भवतु। कामना हि सर्वगुणापहारिणी। सकामस्य मनोबलम्, इन्द्रियबलम्, तेजः, सत्यं च सर्वाणि विनश्यन्ति। शतहस्त समाहर सहस्रहस्त सङ्किर। केवलाघो भवति केवलादी। लोककल्याणवृत्तिर्हि भगवतः श्रेष्ठाराधना। सत्यमेव जयते।

ब्राह्ममुहूर्ते उत्थाय इमे विद्यार्थिनो गुरोः सविधे सन्ध्याविधिं सम्पादितवन्तः। तथा हि—ओ३म् भूः, भुवः, स्वः। 'तत् सवितुः वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्॥' यथाकालं महर्षिणास्य मन्त्रस्य व्याख्या कृता—

विद्यार्थिनः! 'न केवलं स्वग्रामः, जनपदः, देशो वा स्वकीय इति मन्तव्यम्, अपि तु सर्वोऽयं भूलोको युष्माकं भोगाय, ज्ञानाय, रक्षणाय च वर्तते, युष्मत् संरक्षणम्, संवर्धनं चार्हति। तद्यथा पूर्वैः अनूचानैः समर्थितम्—वसुधैव कुटुम्बकमिति। भुव एव वायुलोकः। सोऽपि भूलोकवत् युष्माकं स्वकीय एव वर्तते। सूर्यादिग्रहनक्षत्रैः मण्डितः स्वर्लोकोऽपि युष्माकमानन्दाय विद्यते। एतेषां सर्वेषां लोकानां कल्याणं विदधतो यूयं तेभ्यो लोकेभ्यः परमानन्दस्य, अभ्युदयस्य च प्राप्तिं कुरुत' इति मे मनीषा। अयं मे सन्देशः। एष विधिः युष्माकं श्रेयसे।

(२)

सान्दीपनेः आश्रमे विद्यार्थिनां दैनन्दिनं कृत्यं तेषां सम्यक् विकासाय नियोजितम्। तद्यथा—प्रतिदिनं विद्यार्थिनः स्वकुटीरस्य समीपस्थक्षेत्रभागे शाकानां पुष्पफलदानां लतानां वृक्षकाणां च संवर्धनं कृतवन्तः। आलबालानां सेचनकाले जलपानाय समागताः सस्नेहं परितर्पिताश्च पशु-पक्षिणः तेषां नेत्राभितृप्तये बभूवुः। तैः विद्यार्थिभिः सजीवानां पादपानां पशु-पक्षिणां च स्वभावालोचनं तत्र कृतम्। तान् प्रति सहानुभूतिः दयाभावना च सर्वेषां संवर्धनस्य काम्यया समुत्पन्ना। न केवलं स्वकीयावासास्य स्वच्छीकरणं तैः सम्पादितम्, अपि तु मार्गादीनां निर्मलत्वं सुगमत्वं च विहितम्। प्रातःकाले ज्येष्ठविद्यार्थिनामभिवन्दनं तपोवृद्धानां महर्षीणां पादस्पर्शनं च तैः कृतम्। गुरुगृहस्यावश्यकसामग्रीणां समित्-काष्ठजलादीनामाहरणमपि कर्तव्यमासीत्। एतेषु सर्वेषु कृत्येषु

सामर्थ्यशालिनौ अपि कृष्णबलरामौ सुदाम्नो नायकत्वे प्रहृष्टमनसौ साह्यविधायिनौ बभूवतुः।

(३)

यथापर्यायमिमे त्रयो विद्यार्थिनः शिप्रायाः तटे गोचारणार्थं गतवन्तः। तत्र सुललामवृक्षलतादीनां पुष्पसमृद्धौ प्रफुल्लमनसः ते आत्मानुगमनेन गोप्रसादने तत्परा बभूवुः। तथा हि—वनमाला गुम्फित्वा ते गवामलङ्करणं कृतवन्तः। 'कस्य गौः सर्वाधिकं समलङ्कृता दृश्यते' इति स्पर्धा आसीत्। प्रायशो वनमाली कृष्णोऽस्यां स्पर्धायां प्रथमो बभूव। तृणानामास्वादवद्भिः कवलैः गवां सर्वाधिकसम्भरणे सुदामाऽद्वितीयोऽभवत्। बलरामः कण्डूयनैः दंशनिवारणैश्च गवां सर्वोत्तमां सेवामकरोत्। तेषां व्रतमासीत्—यदा गौः चलति, तदा चलितव्यम्। यदा सा तिष्ठति, तदा स्थातव्यम्। यदा सा जलं पिबति, तदा जलं पातव्यमिति।

एकदा गोचारणाय गन्तुकामाः ते महर्षिपत्न्या समादिष्टाः—इन्धनमानेतव्यमिति। तस्मिन् दिने अपराह्णे सर्वासां गवां रक्षणार्थं बलरामः नियुक्तः। कृष्णः सुदामा च शिप्रायाः परं पारमिन्धनचयनार्थं गतवन्तौ।

प्रचुरमात्रायामिन्धनस्य संचयं कृत्वा यदा तौ प्रत्यावर्तितुं समुद्यतौ, तदा घोरवृष्टिः बभूव। तत्र विद्युल्लतिकानां पतनेन शुष्का वृक्षा दग्धाः। झञ्झावातैः बहवः वृक्षा धराशायिनो बभूवुः। तद्भयङ्करं विध्वंसमालोच्य पतद्वृक्षेभ्यः

आत्मरक्षणार्थं कृष्णसुदामानौ क्वचित् महावृक्षतलं समाश्रितवन्तौ। पतितानां वृक्षाणां शाखाभिः इतस्ततः मार्गावरोधः समजायत । महता प्रयासेनापि वनात् तयोः निर्गमनं न सम्भावितम्।

सर्वा गावः बलरामरक्षिता अपि झञ्झावातैः खिन्ना वृष्टिभिः उद्वेजिताश्च आश्रमं प्रति धावन्ति स्म। बलरामोऽपि कृष्णसुदाम्नोः प्रतीक्षामकृत्वैव आश्रमपदमाजगाम।

(४)

निशागमे कृष्णसुदाम्नोः अनागमनात् गुरोः सान्दीपनेः मनसि महती चिन्ता सञ्जाता। 'कुत्र गतौ मम पुत्रकौ' इति बलरामं पृष्ट्वा स गोचारणस्य वनोद्देशं समाज्ञाय बलरामेण ब्रह्मचारिभिश्च सह तयोः अन्वेषणाय रात्रावेवाश्रमात् निर्गतवान् । ते शिप्रायाः परं पारं गन्तुकामा अपि वृष्ट्या जलौघस्यापूरणात् नदीमवतर्तुमसमर्था बभूवुः। नद्याः तटे तिष्ठन्तः सर्वे सर्वरात्रं तारस्वरेण कृष्णसुदाम्नोः नामग्राहमाह्वानं कृतवन्तः। किन्तु दूरं गतौ तौ विद्यार्थिनौ कथमपि सहाध्यायिनां ध्वानपरिधौ न समागतौ। महर्षिः अनिशं जाग्रदेव तस्मिन् वनोद्देशे योगविधिना मैत्रीभावस्य सम्प्रसारं कृत्वा हिंस्रजन्तुभिः तयोः निर्हाणत्वं व्यधात्। योगबलेन तयोः कुशलत्वं विदधतापि चिन्ताकुलेन मुनिना तत्रैव तमस्विनी व्यतियापिता।

मार्गमीहमानौ कृष्णसुदामानौ विफलीभूय कस्यचित् सुशरणस्य वनस्पतेः अङ्के निलयं कृतवन्तौ। तस्यां त्रियामायां महावृक्षस्य अधस्तात् बहवो वनजन्तवः हिंसका अपि परस्पर

स्निह्यन्तो विचेरुः। तत्र वनराजा अपि हरिणैः सह चिक्रीडुः, मतंगजा वृक्षलतादीनघ्नन्त एव फलभोजिनो बभूवुः। 'निद्रोत्सुकानां पक्षिणां शयने बाधा न भवेत्' इति विचारयन्त इव गोमायवः क्रोष्टुकामा अपि मौनमभजन्त। तत्सर्वमिदं सान्दीपनेः प्रभावादिति निःसन्देहम्।

अन्धतमसे वने आहिण्डमानयोः कृष्णसुदाम्नोः क्षुत्पीडितयोः भोजनवेलोपस्थिता। इन्धनं संगृह्य शीघ्रमेवागत्य अपराह्णभोजनं करिष्यामीति विचार्य कृष्णः स्वभोजनं बलरामस्य समीपे निहितवानासीत्। सुदाम्नः भोजनं तत्रासीत्। किन्तु सुदामा स्वभोजनात् स्वल्पमपि भागं कृष्णाय न दत्तवानिति आश्चर्यकरमप्यवितथं वृत्तम्। तत्कथम्?

'भगवते कृष्णाय यः कश्चित् किञ्चिदपि ददाति, तस्य दारिद्र्यं तेन भगवता झटिति दूरीक्रियते' इति कृष्णमधिकृत्य एका प्रसिद्धा अनुश्रुतिः आसीत्। तद्यथा—विषमपि ददती पूतनाऽमरपदं प्रापिता। सुदामा पुनः विचारितवान्—यदि कृष्णाय भोजनमहं ददामि, तर्हि क्षिप्रमेव ब्राह्मणोचिता दरिद्रता मां परित्यक्ष्यति। तन्न श्रेयस्करम्। जात्वहं समृद्धिं नाकांक्षामि। किं न समर्थितं पूर्वसूरिभिः—

'अनर्थो ब्राह्मणस्यैष यद्वित्तनिचयो महान्'

तत्कथमहं कृष्णाय भोजनं दत्त्वा फलतः वित्तनिचयं लब्ध्वा स्वयं स्वकीयमनर्थं करिष्यामि। अथवा—

'आर्जवे वर्त्तमानस्य ब्राह्मण्यमभिजायते'

इदमार्जवं तु दरिद्राणामेव सहजातम्। धनिनामार्जवं कुतः? तर्हि समृद्धो भूत्वा आर्जवं परित्यज्य कथं स्वयं ब्राह्मण्यात् विमुखो भविष्यामि? ब्राह्मणोऽस्मि जन्मना ब्रह्मकामः। इह जीवने ब्रह्मसंस्थः सन् जीवन्मुक्तो भवितुमिच्छामि। तत्कथं लब्धमनोरथो भविष्यामि यदि कृष्णेन समृद्धीकृतो भवेयम्। श्रुतं हि मया—तपसा चीयते ब्रह्म। तपः कदापि समृद्धिशालिभिः नं साध्यम्। महान् वितर्को मे मनसि वर्तते। कृष्णः मम मित्रं सहाध्यायी लघुभ्राता अस्ति। तस्मै भोजनमदत्त्वा स्वयं खादितुमपि न समर्थः। तर्हि भवतु नामोपवासः आवयोरुभयोः स्वास्थ्यसौष्ठवाय। अयं कोऽपि लाभः। कृष्णः मम प्रवृत्तिं जानन्नपि मित्रत्वेन मां धनिकं कर्तुं वाञ्छति। तस्यानुग्रहोऽयं न स्पृहणीयः। 'न हि कश्चित् दरिद्रः धनिकादवरः' इति मे मतिः। दरिद्रः श्रेष्ठतरं भोगसुखं लभते। तद्यथा—

प्रायेण श्रीमतां लोके भोक्तुं शक्तिर्न विद्यते।
काष्ठान्यपि हि जीर्यन्ते दरिद्राणां च सर्वशः॥

श्रीमतां भोगशक्तिः न विद्यते। दरिद्रोऽपि अहं नाम वस्तुतः स्वोदरे काष्ठमपि जरयितुं समर्थः। न दास्ये, न दास्येऽहं कृष्णाय भोजनम्। स्वयमपि न खादामि।

सुदामा भोजनस्य चर्चामपि न कृतवान्। सुदाम्नो वितर्कं कृष्णः प्रत्यक्षमिवाबोधत्। 'सुदामा मे ज्येष्ठः' इति गुरुणा ज्ञापितोऽस्मि। तर्हि स कथं न मह्यं भोजनं ददाति? मम कृते क्षुद्रमपि दारिद्र्यं परित्यक्तुं नेच्छति। स्वीयमानु-

वंशिकं दारिद्र्यं तु शाश्वतरूपेण परिरक्षितुकामः स निजदैन्यं बहु मन्यते बहुलीकरोति च। कथं तस्य गार्हस्थ्य-शकटिका चलिष्यति ? दारिद्र्यं हि नाम सर्वगुणान् विलोपयति। तस्य दारिद्र्यं तु मयापहरणीयमेव।

तस्मिन्नरण्येऽपि सान्दीपनेः प्रभावेण नाभवत् काचित् बाधा। कृष्णसुदामानौ ऋषेः प्रभावेण सर्वत्र सुखमयानि दृश्यानि साक्षात्कृतवन्तौ। योगप्रभावात् बुभुक्षाया बाधाऽपि दूरीकृता महर्षिणा। तथा हि—यस्य वृक्षस्याङ्के तौ निलयं चक्रतुः तस्य शाखा-प्रशाखासु बहुविधानि सुस्वादूनि सुगन्धीनि च फलानि अकस्मात् प्रादुर्भूतानि। रात्रौ फलभोजनं श्रेयस्कर-मिति वृक्षस्य फलसमृद्धिं दृष्ट्वा प्रहृष्टमनसौ कृष्णसुदामानौ देवेभ्यः फलानि समर्प्य स्वयमपि आपरितोषं भोजनं कृतवन्तौ। सर्वथा निश्चिन्तौ एव तौ सुखशायिनौ बभूवतुः।

अपरेद्युः दिनमणेः अभ्युदयेन नैशं तिमिरं विनिवृत्तम्। सर्वं तत्र वन्यमपि ललामं बभूव। रात्रिकाले शिप्रा स्वजलौघमुज्जयिन्या उपायनरूपेण सरित्पतिं प्रति प्राहिणोत्। सा तटिनी प्रत्यूषे पुनः सुतरा बभूव। महर्षिः शिप्रायाः परं पारं गत्वा शीघ्रमेव शिष्ययोः समागमं कृतवान्। तयोः सम्प्राप्त्या गुरुः निरुत्सुकोऽभवत्। आचार्येण प्रोक्तम्—

अहो हे पुत्रका यूयमस्मदर्थेऽतिदुःखिताः।
आत्मा वै प्राणिनां प्रेष्ठस्तमनादृत्य मत्पराः॥
एतदेव हि सच्छिष्यैः कर्तव्यं गुरुनिष्कृतम्।
यद्वै विशुद्धभावेन सर्वार्थात्मार्पणं गुरौ॥

तुष्टोऽहं भो द्विजश्रेष्ठाः सत्याः सन्तु मनोरथाः।
छन्दांस्ययातयामानि भवन्त्विह परत्र च।।

सान्दीपनिः तयोः शिरसि वरदहस्तं निधाय पुनराशीर्वादं ददौ—'नित्यमेव युष्माकं लोककल्याणवृत्तयः संवर्धन्ताम्' इति। वनोद्देशादाश्रमाभिमुखं ते सर्वे प्रतिनिवृत्ताः।

(५)

शनैः शनैः कृष्णबलरामौ सुदामा च वेद-वेदाङ्ग-पुराणेतिहास-दर्शन-धर्मशास्त्रादिषु चतुर्दशविद्यासु निष्णाता बभूवुः। चतुष्षष्टिकलानां प्रमुखासु ते यथारुचि प्रावीण्यं प्राप्तवन्तः। अपरञ्च कृष्णस्तु राजनीतौ, धनुर्वेदे, रथचर्यायां च वैशारद्यं लब्धवान्। बलरामः आ हिमालयात् समुद्र-पर्यन्तं तीर्थानां नदीपर्वतानां च स्थितिं माहात्म्यमुपयोगितां च भौगोलिकदृष्टया सविवेचनं शिक्षितवान्। सुदाम्ना तु प्रयोजनापेक्षया परा विद्या सविशेषमधीता।

विद्यासु पारंगताः ते गुरुणा समावर्तनाय समादिष्टाः। सुदामा तु समावर्तनकामो नासीत्। 'आश्रमजीवनमेव वरेण्यतमम्' इति तेन मनसि कृतम्। स गुरवे निवेदितवान्—नाहं समावर्त-नायोत्सहे प्रभो। नाहमैन्द्रियकभोगविलासप्रपञ्चेषु स्वल्पमपि भागं स्वजीवनस्य व्यर्थीकर्त्तुमिच्छामि। आध्यात्मिकानन्दस्य तुलनायां क्व तिष्ठन्ति ग्राम्यसुखानि ः प्रकृतेः सुखं तुच्छमेव, प्राकृतजनोचितं भवति तत्। ब्रह्मनिष्ठानां परमानन्दोऽनुपमेयो-ऽसीमश्च वर्तते। अपरं च—लौकिकसुखानां ब्रह्मानन्देन सह सामञ्जस्यं नास्ति। किं न गुरुदेवेन प्रबोधितम्—एतेन

तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थाय भिक्षाचर्यं चरन्तीति।

सुदाम्नोऽभिप्रायं विदित्वा सान्दीपनिः प्रोवाच—शोभनमिदं नैष्ठिकब्रह्मचर्यपदं पुरा महर्षिभिः सुप्रतिष्ठितं च वर्तते। तथापि भारतीयगृहस्थानामधुना सदाचारविमुखीं जीवन-वृत्तिं पर्यालोचयामि। 'तव ज्ञानस्य शक्तेश्च सदुपयोगो गृहस्थाश्रमिणामभ्युदयनिःश्रेयस-पथप्रदर्शनाय भवतु' इत्यहं प्रशस्यं मन्ये। नहि नैष्ठिकब्रह्मचारी गृहस्थानां मध्ये गच्छेदिति मे मतम्। गृहस्थानां कृते तस्योपयोगो गौणरीत्यैव भवेत्। गृहस्थः सन् त्वं ब्रह्मपरायणसन्तानोत्पादनेन देशस्य शाश्वतकल्याणपरम्परां विधातुं समर्थोऽसि।

गुरोः सन्देशं श्रुत्वा सुदामा स्वजीवनस्याभिनवोत्कर्षक्रमं लक्षितवान्। स प्रसन्नमनसा समावर्तनायोद्यतो बभूव। समावर्तनस्नानं कृत्वा ते स्नातकाः समपद्यन्त। तस्मिन्नवसरे ते ब्रह्मतेजसातीव रोचमाना एव सम्प्रकाशिता बभूवुः। ते गुरुमभिवन्दितवन्तः—त्वं हि नः पिता, त्वमस्मान् विद्यायाः परं पारं तारयसीति। इमे त्रयः स्नातकाः शोभनाभिः मालाभिराचार्यमलङ्कृतवन्तः।

सान्दीपनिः समावर्तन-प्रवचनं कृतवान्—सत्यं वद। धर्मं चर। स्वाध्यायात् मा प्रमदः। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्। देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव। पितृदेवो भव। आचार्य-

देवो भव। यान्यनवद्यानि कर्माणि, तानि सेवितव्यानि। नो इतराणि। यान्यस्माकं सुचरितानि, तानि त्वयोपास्यानि। नो इतराणि।....एष आदेशः। एष उपदेशः। एषा वेदोपनिषत्। एतदनुशासनम्। एवमुपासितव्यम्।

सुदामानं संबोध्य सान्दीपनिः विशेषतरं प्रोक्तवान्—'शुश्रूषवे ब्राह्मणाय ब्रह्म सदा देयम्। अयं वेदो विस्तार्यताम्। शिष्याः सुकरणीये एव नियोगे नियोज्याः। नित्यमेव वेदाध्ययनं त्वया करणीयम्। तव प्रयत्नेन सर्वे दुर्गाणि तरन्तु सर्वे भद्राणि पश्यन्तु च। कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान् विदधदात्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्याहिंसन् सर्वभूतानि त्वं खलु एवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसम्पद्यसे। न पुनरावर्तनाय।'

'आजीवनं नित्यमेव ब्रह्मविद्याया निःशुल्कमध्यापनं करिष्यामि' इति सुदाम्नः प्रतिज्ञा-वचनमेव सान्दीपनिः सर्वोत्तमां गुरुदक्षिणामवधारितवान्। कृष्णबलरामौ गुरवे महतीं सम्पत्तिं गाः सुवर्णरत्नादीनि च समर्पितवन्तौ। 'इयं सम्पत्तिः विद्यार्थिनां सम्पोषणाय विनियोज्या' इति गुरुणा समादिष्टम्।

स्नातका एव ते महतामपि सम्मानार्हा बभूवुः। आचार्यः सान्दीपनिः प्रथमं मधुपर्कविधिना तेषां सम्मानं कृतवान्।

'अद्य समावर्तन-दिवसः सान्दीपनेः स्नातकानाम्' इति प्रतिवर्षानुसारं तेषामभिनन्दनाय उज्जयिनीवासिभिः महोत्सवस्यायोजनं महाकालमन्दिरस्य प्राङ्गणे समारब्धम्। सान्दीपनेः आश्रमादारभ्य उज्जयिनीपर्यन्तं मार्गः सविशेषं समवर्तसितः।

उज्जयिन्यां सर्वत्र विचित्रवर्णैः तोरणैः ध्वजच्छायैश्च राजपथानां मनोज्ञता सम्पादिता। समृद्धानां निर्धनानां वा सर्वेषां प्रतिगृहं स्वागतदीपा उपस्थापिताः। आबालवृद्धं जनानां हृदये स्नातकानां दर्शनार्थं पराकांक्षा संववृधे।

आचार्यैः सह स्नातकानां यात्रा राजपथे समारब्धा। तत्र दर्शनोत्सुकजनानां सम्मर्दो बभूव। सर्वाणि कार्याणि परित्यज्यापि पुरसुन्दर्यः कृष्णप्रमुखाणां स्नातकानां दर्शनार्थं सौधानामालोकनमार्गेषु निश्चलमात्मानं सन्निवेशयामासुः। उज्जयिनी तु महोच्चैः चलध्वजैरेव तेषामालोकनार्थं समुत्सुकेव परिस्फुरितवती।

साङ्गवेदविद्यादिषु पारङ्गतः उज्जयिनीपतिः महर्षेः सान्दीपनेः अन्तेवासी आसीत्। स प्रतिवर्षं समावर्तन-दिवसे स्वयं स्नातकानामाचार्याणां च सम्मानं कृत्वात्मानं बह्वमन्यत। 'स्नातकानां यात्राविदूरं समागता' इति विज्ञाय तेषामर्चनार्थं हिरण्मयपात्रेऽर्घ्यं निधाय स नगरद्वारं प्रत्युज्जगाम। प्रणत एव स तेषां सर्वेषामाचार्याणां स्नातकानां च पूजां स्वहस्तेन विधिवत् सम्पादितवान्।

सान्दीपनेः प्रभावात् समुन्नताः समुत्साहिताश्चासंख्येया नागरिका महाकालमन्दिराजिर-सभायां समागताः। महर्षेः संवासेन नगरस्य गौरवं मन्यमाना दीनाः समृद्धिशालिनश्च सर्वे संख्यानसीमातिगं धनमाश्रम-संवर्धनायोपहृतवन्तः। नागरिकप्रमुखाश्च माल्यादिभिः भोजनोपायनैश्च स्नातकानां सम्मानं कृतवन्तः। सान्दीपनिः महाकालेश्वरस्य महिमानमधिकृत्य नागरिकाणां स्नातकानां च पुर उपन्यासं विदधे।

सर्वे स्नातका महाकालमर्चितवन्तः। उज्जयिन्या वैभवं प्रथमवारमेव दृष्ट्वा प्रायशः स्नातका भारतवसुन्धराया वैभवेन भृशं व्यस्मयन्त।

(६)

आश्रमात् निर्गत्य कृष्णसुदामानौ परस्परं मैत्रीभावं गाढं सन्दधतुः । कृष्णः स्वबाहुं प्रसारितवान्। सुदामा स्वपाणिना कृष्णस्य पाणिं गृहीतवान्। अनन्तरं तौ काष्ठं सञ्चितवन्तौ। अग्निः दीपितः । पुष्पैरग्निदेवस्यार्चना सम्पादिता। पूर्वापरं स्थितौ कृष्णसुदामानौ अग्नेः प्रदक्षिणां कृतवन्तौ । अनेन विधिना तौ स्वमित्रत्वं प्रत्यग्रं समेधितवन्तौ। तदा सहाध्यायिनोः मनसि सात्त्विकोऽयं भावः प्रवर्तितः—

आढ्यो वापि दरिद्रो वा दुःखितः सुखितोऽपि वा।
निर्दोषो वा सदोषो वा वयस्यः परमा गतिः॥
धनत्यागः सुखत्यागो देहत्यागोऽपि वा पुनः।
वयस्यार्थे प्रवर्तन्ते स्नेहं दृष्ट्वा तथाविधम्॥

आचार्यस्यादेशानुसारमिमे स्नातका उज्जयिनीतः देशदर्शनार्थं पृथक्-पृथक् जनपदाभिमुखं प्रातिष्ठन्त । बलरामः प्रायशः नदी-पर्वत-प्राङ्गणेषु अवस्थितानि तीर्थानि द्रष्टुकामः दक्षिणभारताभिमुखं जगाम । यत्र-तत्र महाजनसभासु बलरामः भारतदेशस्य महनीयस्थलानां महापुरुषाणां च प्रभावशालि स्वरूपनिरूपणं वितेने।

भारतस्य विविधभागेषु प्रतिष्ठितानां राज्ञां संघं स्थापयितुकामः कृष्णः तेषां परस्परं सौहार्दस्थापनार्थं रथचर्यया-

चिरमेव सुदूरप्रदेशानामपि चंक्रमणमारब्धवान्। तस्य प्रयत्नेन बहूनां राज्ञां परस्परं सौमनस्यं प्रादुरभूत्। 'कृष्ण एव भारतस्य भाग्यविधाता' इति प्रायस्तेऽवधारितवन्तः।

ऋषि-दर्शनकामो वनोद्देशेषु विचरणशीलः सुदामा परिभ्रमणकाले आ विन्ध्यात् हिमालय-पर्यन्तं चित्रकूट-प्रयाग-काशी-बदरी-क्षेत्रेषु ब्रह्मविद्यायां पारंगतानामाचार्याणां प्रवचनं श्रुतवान्। स्वयमपि ग्राम्यकृषकजनेषु वेदपुराणादीनां सारं प्रतिपाद्य सर्वत्र व्याख्यातवान्। पूर्वनिश्चयानुसारं वर्षान्ते त्रयः स्नातका मथुरायां संगताः। सुदामा कृष्णस्यातिथ्यं स्वीकृत्य तत्र कञ्चित् कालमुवास।

(७)

मथुरावासकाले कृष्णः मित्रं सुदामानं सश्रीकं विधातु-काम एकदा तस्मै निवेदितवान्—ब्रह्मन्, इदानीं भवान् स्नातकः। स्नातकः समाजस्य सुप्रतिष्ठितो नागरिको भवति। तदनुरूपं भवता नित्यमेव स्वशरीरं प्रसाधनीयम्। वेषभूषा-दिभिः भवता भद्रेण भवितव्यम्। पुराणं जीर्णं मलिनं वा वस्त्रं न परिधानीयम्। तत्सर्वमिदं सौष्ठवं धनेनैव शक्यसम्पादम्। धनं हि स्नातकेन स्वशक्तीनां सदुपयोगेनार्जितव्यम्। किन्तु भवतः प्रवृत्तिः तादृशी नास्ति। भवान् धनार्जनं कर्त्तुं न वाञ्छति। तर्हि भवतः स्नातकधर्मस्य निर्वाहः कथं भवेत्? अथवा स्नातकस्तु निवेशार्थी भवेदिति विधानमनुसृत्य भवता शीघ्रमात्मानुरूपिणी गृहिणी परिणयेन प्राप्तव्या। न कापि पतिंवरा दीनवृत्तिं जनं भर्तृरूपेण कामयते। भवान् मम मित्रम्।

मम धनं तु भवतो धनम्। समानो भवतु भवान् समृद्ध्यापीति मे मनीषा। रत्नराशेः उपायनेन, दास-दासीनां प्रदानेन, प्रासादावासोपहारेण च भवन्तं सुखिनं द्रष्टुमिच्छामि।

सुदामा कृष्णस्य वचनं यथाकथञ्चित् शृण्वन्नपि अबोधित इव तस्य प्रस्तावेनास्पृष्टमानस एवं जगाद—नहि भो कृष्ण! तवानुरूपो जीवनादर्शो मह्यं रोचते। सहाध्यायिनोः आवयोः मैत्री तु भगवतः सान्दीपनेः आचार्यस्योभयनिष्ठस्य स्नेह-ग्रन्थेः परिचायिका वर्तते। नायं मित्रभावः समानपदव्यपेक्षः। कुत्र त्वं भारतसाम्राज्याधीशपदार्हः, क्वाहमकिञ्चनो ब्रह्मैकधनो ब्राह्मणः? नाहं युष्मादृशः वैभवकामः। परिग्रहो हि नाम कस्यचिज्जनस्य निःश्रेयसपथे महान् प्रतिबन्धः। यथा त्वं दारिद्र्ये दोषं पश्यसि तथैवाहं सम्पत्तौ लोकैषणायां वा दोषं पश्यामि। लोकैषणा हि मानवं सत्पथात्, अध्यात्मवृत्तेर्वा दूरमपसारयति। निवेशार्थी खलु गुरूणामादेशेनास्मि। स्वभावतस्तु नैष्ठिक-ब्रह्मचर्यं स्वीकर्त्तुमभीष्टवान्। तथापि गुरूणामाज्ञा शिरोधार्या। श्रुतं हि मया 'भगवतः प्रसादादेव समानवृत्तिकापि गृहिणी प्राप्यते क्वचित् स्नातकेन' इति।

कृष्णस्याभ्यर्थनां सुदामा न उररीचकार। अतएव खिन्न मना अपि प्रियङ्करः कृष्णः विचारितवान्—सुदामा तु परीक्षणीयः। दैन्यातिरेकेण व्यापन्नः स कथं व्यवहरतीति दर्शनीयम्। गृहस्थः सन् स वहूनामपत्यानां पिता भविष्यति, गृहिणी च तस्य मथुरावासिनी मधुरप्रिया चेद्भवेत्! नायं सुदामा आत्मकष्टैः उद्वेजितोऽपि धनकामः। कथं नाम गृहिण्या प्रेरितो वैभवं कांक्षेदिति।

यथाकालं सुदामा स्वर्गादपि गरीयसीं जननीं जन्मभूमिं च द्रष्टुकामः कृष्णेनानुज्ञातः निजग्रामं गतवान्। तत्र यत्किञ्चिदखिले भारतवर्षे नैसर्गिकं मानवकृतं वा साक्षात्करणीयम्, श्रवणीयम्, भावनीयं वावर्त्तत, तस्यावबोधं वर्णन-कौशलेन ग्रामवासिनां हृदयंगमं कारयन्नेव ससुखं कालं निनाय।

(८)

वसन्तागमने मथुरायां राजमहोत्सवो महाराजेनोग्रसेनेनायोजितः। तस्मिन् महोत्सवे मथुरां सभाजयितुं भारतवर्षस्य विभिन्नेभ्यः प्रदेशेभ्यः ब्रह्मविदः, कवयः, शिल्पाचार्याः, नाट्यसंगीतनृत्याचार्याश्च तेन निमन्त्रिताः समागताश्च। तेषां स्वागतार्थं गोपुरद्वारमार्गेषु कौतुकस्वर्णतोरणाः, विविधवर्णा मालाः, चित्रध्वजपताकाश्च विनिबद्धाः। तत्र महामार्गापणकचत्वराणि चन्दनागुरुगन्धजलैः सिक्तानि बभूवुः। गृहाणां द्वारि द्वारि तरुपल्लवमालाभिः दध्यक्षतफलेक्षुभिः पूर्णकुम्भैः बलिभिः धूपदीपकैश्चालंकरणं कृतम्। आगन्तुकानां दीपावलिभिः, मांगलिकाचारैश्च कन्यका नागरिकाश्च सप्रत्युद्गमनमर्चनां सम्पादितवन्तः। ऋत्विजः ब्रह्मघोषेण हर्षं समजनयन्।

शिल्पकलादीनां प्रतिस्पर्धा नगरस्य विविधभागेषु समुपस्थापिताः। तथा हि—गन्धर्ववीथ्यां वसन्तोत्सवे कामार्चनस्य दृश्यमासीत्। मनोरमा रामा आम्रमञ्जरीं कामदेवाय समर्पितवत्यः। प्रथमं सामूहिकं सार्वजनीनं च चर्चरी-संगीतमभूत्। अनन्तरञ्च नृत्यसंगीतनाट्याचार्याः शिष्यगणैः

परिवृता एव पृथक् पृथक् स्वकीयं ज्ञान-विज्ञान-वैशारद्यं प्रादर्शयन्। शिल्पकार-वीथिषु चित्रमूर्ति-प्रसाधनादीना-मभिनवोन्मेषपरिचायिकाः कलाकृतयः सहृदयानां मनसा सह नेत्राण्यपि जगृहुः। वीरवीथिषु अस्त्रशस्त्रोपजीविनां मल्लादीनां च कौशलप्रदर्शनं सर्वेषामुत्साहं समवर्धयत्। तासु सर्वासु प्रतिस्पर्धासु पुरस्कारार्हान् विवेचयितुं महाराज उग्रसेनः स्वयमालोचनप्रवणैः प्राश्निकैः सह निर्णेता बभूव।

'अस्मिन् वर्षे कः स्वित् स्नातकानामनूचानतमः' इति जिज्ञासोः उग्रसेनस्य महती प्रीतिः ब्रह्मोद्यसभायामासीत्। समग्रभारतस्य तात्कालिकाचार्याणां व्यास-सान्दीपनि-द्रोण-गर्गादीनां प्रमुखाय ब्रह्मविद्यापरायणा विद्या-व्रत-स्नाताः स्नातकाः तस्मिन् ब्रह्मोद्ये निमन्त्रिताः संगता अभूवन्। सततं मित्रहितमवदधता कृष्णेन समाहूतः सुदामा तस्मिन् ब्रह्मोद्ये समागतः।

महाराज उग्रसेनः राजपुरोहितेन गर्गेण सह ब्रह्मोद्यसभां सभाजितवान्। 'किमिदं ब्रह्म, ब्रह्मचर्यं च' इति विषयमधि-कृत्य स्नातकानां शास्त्रचर्चा समजनि। शास्त्रार्थप्रक्रमे सुदामा प्रवक्तुमारभत—'सर्वं खल्विदं ब्रह्म। मनोमयः, प्राणशरीरः, भारूपः, सत्यसंकल्पः, आकाशात्मा, सर्वकर्मा, सर्वगन्धः, सर्वरसः, एष म आत्मान्तर्हृदये ज्यायान् पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान्दिवो ज्यायानेभ्यो लोकेभ्यः। एतद्-ब्रह्म। तद्ब्रह्माधिगन्तुं चर्यमेव ब्रह्मचर्यमिति'।

अनेन ब्रह्मोद्येन परं प्रीताः सुबोधिताश्च सर्वे 'सुदामानू-चानतमः' इति निर्णीय साधुवाद-पुरस्सरं तं 'विप्रः' इत्युपा-

धिनालङ्कृतवन्तः। गर्गाचार्यः सुदाम्नो ज्ञानगरिम्णाभिभूतः तं पर्यष्वजत। प्रसन्नमना महाराजः सुदाम्नः माहात्म्यं ख्यापयन् ब्रह्मयानेन तमुदवहत्।

(९)

राजपुरोहितस्य गर्गाचार्यस्य कन्यका विदुषी कौमुदी तस्यां ब्रह्मसभायां पित्रा सहोपस्थितासीत्। सा वृन्दावन-गुरुकुलस्य स्नातिका बभूव। गुरुकुलस्य ब्रह्मोद्येषु सा ब्रह्म-विषयकं साधारणज्ञानं लब्धवती। सुदाम्नः ब्रह्मव्याख्यां श्रुत्वा कौमुदी विचारितवती—महानयं पण्डितः सुदामा। नासीद-स्माकं गुरुकुले कश्चिद्विद्वानीदृशं प्रवक्तुं क्षमः। सुदाम्नः संक्षिप्तोऽपि ब्रह्मनिर्घोषोऽनुपम एव। नैकस्याप्यक्षरस्य तत्र वैयर्थ्यमासीत्। ब्रह्मविषयकाणि सर्वाणि विशेषणानि सुपरि-चितान्येव प्रयुक्तानि। सर्वेषामेकत्वं विधातुं ब्रह्मणः सर्वात्मक-रूपं मृदु-मधुर-पदैः तेन प्रकाशितम्। तत्र सर्वेषां श्रोतॄणां हृदये ब्रह्मणः प्रकाशः प्रतिभातः। महानयं सुदामा। सर्वेषां हृदि पदमनेन विहितम्। न कोऽपि तं विस्मर्तुं क्षमः। विप्रोऽसौ कृष्णस्य सतीर्थ्यं इति मया श्रुतम्। तथापि कथं नाम रूप-शील-गुण-सम्पन्नोऽपि सुदामा दुर्वासा एव दीनो दृश्यते। 'कृष्णः कथं तस्मै ऐश्वर्यं न ददाति' इति वितर्कोऽसमाधेयः। अथवा को जानाति कृष्णस्य लीलापूर्णं कृष्णत्वम्? 'स स्वयं किं करिष्यति, अपरांश्च किं कारयिष्यति' इति सर्वं जनमनोऽतिगम्। तातोऽपि वसुमान्। कथं नाम स एव सुदाम्नः दुर्ललितां दरिद्रतां न दूरीकुर्यात्। स्नातका

महतामपि सम्मानार्हां मधुपर्कविधिना। तातोऽपि सुदामानं निमन्त्रयेत् चेत् !

गर्गाचार्यस्तु सुदाम्नः प्रवचनमाकर्ण्यात्यन्तमावर्जितोऽभवत्। कृष्णेनाभिवर्णितं सुदाम्नः श्रुतं शीलं चातिशयं विज्ञाय निवेशार्थिनं च तं दृष्ट्वा स स्वकन्यकां कौमुदीं तस्मै प्रदातुमियेष। स विवाह-विषये कृष्णं परामृष्टवान्। 'प्रस्तावोऽयं हृद्यः' इति कृष्णः तमनुमोदितवान्। कृष्णस्यानुमोदनेन प्रहृष्टः गर्गाचार्यः कौमुदी-मातुः सम्मतिमभीष्टां मेने। सुदाम्नः गुणगणनाकलय्य सा 'शोभनोऽयं कल्पः' इति प्रथममुक्त्वापि पश्चात् कौमुद्या मतं विज्ञाय सुदाम्नो निर्धनत्वमेव कल्पस्य प्रत्यादेशायालममन्यत। गर्गाचार्यः तदा स्पष्टमेव समाहितवान्—यद्यपि सुदाम्ना सहोद्वाहोऽयं ब्राह्मविधिना सम्पत्स्यते, ब्राह्मविवाहे च नाधिकं यौतुकं वराय देयं वर्तते, तथापि विवाहानन्तरं यथेष्टं धनं वराय दत्त्वा तं धनिनं कर्तुं समर्थोऽस्मि। मम गृहे प्रायोऽचिरविलासिनी श्रीरपि शाश्वतसंवासं करोति। तद्धि सुदाम्नो निर्धनत्वं क्षणिकमिति ज्ञेयम्।

गर्गाचार्यस्याश्वासनमासाद्य सर्वे प्रमुदितमानसा बभूवुः। उग्रसेनोऽपि तं ब्राह्मविवाहं समर्थयमानः प्रोवाच—स्वकीयस्य ब्रह्मोद्यस्य परं साफल्यमेव मयानुभूतमस्मिन् प्रकरणे। मथुरानगरे सुदाम्नो विवाहस्य महान् उत्सवो भवतु। निवेशार्थिने सुदाम्ने राजकीयकोशाद् यथेष्टं धनं प्रदेयमस्माभिः।

(१०)

कृष्णस्तु कौमुद्या सह परिणयोदन्तमादाय सुदाम्नः

समीपं गतवान्। स सुदामानं प्राबोधयत्—मित्र, राजपुरोहितस्य गर्गाचार्यस्य कन्येयं कौमुदी वृन्दावन-गुरुकुलस्य स्नातिका न केवलं गृहकर्मसु निपुणा, अपि तु सर्वेषु वेद-वेदाङ्गादिषु निष्णाता वर्तते। कुलमिदं गर्गाचार्यस्य ब्रह्मपरायणं विश्रुतमेव। नास्मिन्कुले काप्यसाध्यरोग-बाधा। बुद्धिमती कौमुदी तु स्त्री-रत्नमेव सौन्दर्येण, शीलेन, शिल्पादिज्ञानेन च गार्हस्थ्य-धर्म-निर्वाहे स्वभावतः भवतः सहाया भविष्यति। सा सर्वथा सुलक्षणा। तस्या नामापि रमणीयार्थप्रतिपादकमिति।

कौमुद्या वर्णनेन निवेशार्थिनः सुदाम्नः मनसि तां प्रति कौतुकपरा प्रवृत्तिः समजायत। क्षणं विचार्य स उवाच—मित्र, सर्वं शोभनमस्मिन् कल्पे दृश्यते। तथापि सम्पादितवैभवस्य राजपुरोहितस्य गर्गाचार्यस्य कन्या सा कौमुदी कथं निवृत्तधनस्य मम गृहे सुखार्थिनी भूत्वा वत्स्यति? अवश्यमेव तस्याः कृतेऽपेक्षितवस्तूनां समाहरणे एव मम जीवनमपयास्यति। अहं तु दीनकुलस्य कन्यकां स्वकीयां भार्यां कर्त्तुमैच्छम्। तथापि तव कल्पोऽयं नास्वीकरणीयः। महतां वचने प्रत्यक्षं वैषम्यमपि वितथं भवति। ब्रह्मोद्ये कौमुदी मया दृष्टैव वर्तते। सापि मां जानाति। मया सा स्वीकरणीया।

विवाहस्य पुण्या तिथिः ज्योतिर्विद्भिः सुनिर्णीता। दारपरिग्रहार्थं पुनरागमनाय सुदामा तस्मिन् दिने स्वगृहं प्रति प्रतस्थे।

(११)

'श्वः सुदाम्नः कौमुद्या सह परिणयो भविता' इति संवादः सकल-मथुरापुर-वासिनां श्रवणगोचरतामवाप। गर्गाचार्यस्य सर्वप्रियत्वात् प्रतिगृहमुत्सवः समजायत। पुरन्ध्रीवर्गे विशेषतः महानुत्साहोऽदृश्यत। एककुलमिव तन्नगरं वैवाहिकसंविधानेषु व्यापृतमभवत्। सर्वत्र पुरं सुसज्जीकृतम्। तथा हि—श्रीपथेषु सन्तानकपुष्पाणि समाकीर्णानि। कौशेयैः केतुमालाः प्रकल्पिताः। उज्ज्वलकाञ्चनतोरणानां प्रभाभिः सर्वं तत्र स्वर्गीयमेवासीत्।

विवाहानन्तरं कौमुदी मथुरां परित्यज्य पतिगृहं गमिष्यतीति भावनया तस्याः पित्रोः स्वान्तं विशेषोच्छ्वसितं बभूव। कुटुम्बिजनैः परम्परयाङ्के धारिता दत्ताशीः च कौमुदी सोत्कण्ठासीत्। पौरजनाः तस्यै बहुविधानि श्रेष्ठान्याभूषणानि ददुः। तस्मिन्दिवसे सा कौमुदी सर्वेषां स्नेहस्यैकायतनमभूत्।

गृहीत-सर्वाभरणा कौमुदी पुष्पैः लतेव, ज्योत्स्नाभिः विभावरीव, पक्षिभिः निर्झरिणीव च शुशुभे। स्वकीयं रूप-सौन्दर्यं विभूषणैः प्रसाधनैश्च द्विगुणीकृतं निर्मलादर्शे परिलक्ष्य सा तदधिकृत्य सुदाम्नोऽपि प्रशंसामाशशंसे। सत्यमेव भणितं विज्ञैः—'प्रियेषु सौभाग्यफला हि चारुता' इति।

(१२)

सुदाम्नः ग्रामे तस्योद्वाहवृत्तेन सर्वेषां मनांसि प्रफुल्लानि बभूवुः। न तत्रासीत् प्रसाधनादीनां सामग्रीणां प्राचुर्यम्। ग्रामवनिताभिः सम्पादितैः हरिद्राचन्दनलेपनादिकैः वन्य-

पुष्पाणां मालाभिश्च सुदामा समवतंसितः। तासां निर्देशे स कुलदेवतानां पूजां विहितवान्।

तस्मिन् ग्रामे चिरादेव सर्वेषां ब्राह्मणयुवकानां विवाहार्थं यत् सामान्यं परिधानम्—शिरोवेष्टनोत्तरीयकञ्चुकादीनि, छत्रम्, पदत्राणञ्च सुरक्षितमासीत्, तत्सर्वं सुदाम्नः कृते ग्रामपतिना निवेदितम्। तैः जीर्णपरिधानैरपि सुदाम्नः कमनीयता ग्रामीणेभ्यः सातिशयं चकाशे। नहि महतां चारुता परिधानैः अलङ्कारैः, प्रसाधनैर्वा भवतीति सुदाम्नः स्थेयसी धारणाभवत्। स्नातकस्य मण्डनाय तथ्यतो नास्ति कौशेयादीनामपरिहार्यता। ब्रह्मचर्यतेजसा, ब्रह्मोर्जस्वितया च तस्य मुखमण्डलं परिस्फुटं चकास्ति स्म। 'सुदाम्नः सर्वेषु गात्रेषु किञ्चिदनुपममेव प्रभालावण्यमस्ति' इति दर्शकैः परिलक्षितं परस्परं साश्चर्यमेव प्रशंसितञ्च। ग्रामीणानां हृदयानि सुदाम्नः परोपकारवृत्त्या सौहार्देन च सुवासितानि ववृतिरे। वरयात्रा-दिवसे सुदामा चतुर्वर्णानां वृद्धजनानामाशीर्वचांसि, समवयस्कानामभिनन्दनानि, बालकानां चाभिवन्दनानि सम्प्रहृष्टमानस एव जग्राह। कतिपयैः ग्रामवृद्धैः समवयस्कैश्चानुयातः शकटिकायां स मथुरां प्रति प्राचलत्। मङ्गलातोद्यादीनां यत्र-तत्र ध्वानेन बालकानां कौतुकपूर्णकोलाहलेन च पथि वरयात्रा प्रख्यापिता बभूव।

(१३)

'अपूर्वोऽयं कश्चित् स्नातकः विवाहाय गच्छति' इति सुदाम्नः ब्रह्मतेजसा सर्वे दर्शका विस्मिता आसन्। प्रति-

ग्रामं पण्डितवरेण्या वृद्धाश्च सुदाम्नः स्नातकत्वं पर्यालोच्य तदनुरूपा आशिषो ददुः।

कृष्णस्तु सुदाम्नः मनोवृत्तिं सर्वथाजानात् यत् स ग्राम्य-वेशे एव विवाहार्थं मथुरामागमिष्यति। इमां स्थितिं विचार्य सुदाम्नः कृते परिधान-प्रसाधन-रत्नादीनि गृहीत्वा स कतिपयक्रोशान् राजरथेन गत्वा मथुरासविधे वसुकाम-ग्रामे उपस्थितोऽभवत् । सुदामात्रैव प्रथममानेतव्य इति समादिष्टो दूतो यथाकालं वरेण सह तत्र समायात्। कृष्णेन नागरिकरीत्या सुदाम्नः सहचारिणां च स्वागतं समाचरितम्। 'अस्माकमेव वस्त्राभूषणानि वरेण परिधानीयानीति माथुराणां रीतिं कृष्णमुखात् श्रुत्वा सुदामा यथाकथञ्चित् स्वकीयं ग्रामवेशं परित्यज्य कृष्णानीतानि वस्त्रादीनि गृहीतवान्। 'कदापि बहुमूल्यानि प्रसाधनादीनि न धारयामि' इति व्रतधारी सुदामानिच्छन्नपि कृष्णस्यानुरोधेन स्वव्रताननुरूपमपि तत्सर्वं परवश इव चकार। 'किं किं न कारयिष्यत्ययं कृष्णः' इति विमृश्य सुदामा चिन्तापरोऽभूत्।

कृष्णार्पितानि परिधानानि धारयित्वा सुदामा सुसम्पन्नः, भव्यश्च नागरिकः प्रत्यभासत। अभितस्तं चामरग्राहिणौ सादरमसेवेताम्, वन्दिनश्च जयवाचमुदीरयामासुः, तस्य महिमानमगायंश्च।

प्रत्युद्गतेन कृष्णेन सह सुदामा वसुकामग्रामात् राज-रथमारुह्य मथुरां प्रति प्रचलितः। पथि सञ्चरिष्णूनां मनो-विनोदार्थमिव तत्रत्या प्रकृतिः समुद्यता प्रत्यभासीत्। तथा हि—मृगा वियति प्लुतमुदग्रं प्रादर्शयन्। पंक्तिबद्धाः सारसाः

तोरणमालां प्रास्ताविषुः । शुका स्थ-शिखरे पुनः पुनः उपविश्य स्वर्णकेतुसज्जितमपि रथं हरितकेतुभिः सज्जयन्तः इवाचेरुः । जलाशया वरयात्रादर्शनोत्सुका नेत्राणीवारविन्दकुलान्यतिविकचय्यामोदमुपजह्रुः । यमुनाजलसम्पृक्तसुखस्पर्शशीतलवाताः विप्रकृष्टानामपि वनगुल्मौषधीनां सौरभमुपदीकृतवन्तः । राजपथेषु वृक्षाश्रितलताः प्रसूनवर्षणमकार्षुः ।

मथुराया महाद्वारसमीपे वरयात्रायाः स्वागतार्थं मङ्गलामोदपूरः समाज एकत्र बभूव । स्वयं महाराज उग्रसेनः राजगजादवरुह्य सुदामानमभिनन्दितवान् । सर्वे मन्त्रिणः प्रमुखराजकार्याधिकारिणश्च महाराजमनुचक्रुः । अश्रूयत तत्र नारीसमाजस्य माङ्गलिकगीतिः । सर्वमनुष्ठानं नृत्तवादित्रगीताढ्यं बभूव ।

आकीर्णपुष्पराशिषु नगरवीथिषु नववधूभिः समर्पितैः लाजैः सह तासां कमलनयनविक्षेपैः समुदाचारः पप्रथे । 'कृष्णसतीर्थ्यस्योद्वाहोऽयम्' इति नागरीणां सम्भ्रमोऽपूर्व एवाभवत् । सुदाम्नः स्नातकप्रतिभासम्पन्नं ज्ञानगरिम्णा प्रतिभातं स्वरूपं दर्शं दर्शं कौमुद्याश्च तदनुरूपत्वं समालक्ष्य अनयोः सङ्गमनं विधिनानुपमकौशलेन विहितमिति नगरवधूनां मिथः संलापोऽश्रूयत ।

(१४)

वरयात्रा गर्गाचार्यस्य प्राङ्गणे समागता । तत्र मध्यभागे आम्रादिपल्लवैः समवतंसितो जलकलश ऋतसदनमिति

विश्वस्य पूर्णतामभिव्यञ्जयन् प्रतिष्ठापितः आसीत्। आचार्यः स्वयं सरत्नमर्घ्यम्, मधुमद् गव्यम्, नवे दुकूले च वरार्चन-विधिना समर्पितवान्। महापण्डिता वधूवरस्य कुलवैशिष्टयं व्याख्यातवन्तः। गर्गाचार्येण सद्ब्राह्मणेभ्यः स्वर्णशृङ्गयः, सम्पन्नाः, सवत्साः, कांस्यदोहनाः च गावः प्रदत्ताः।

अन्तःपुरचारिकाभिः सुदामा कौमुद्याः समीपं निन्ये। उद्वाहगृहे तत्र प्रथमवारमेवापूर्वनारीसौन्दर्यं लोचनगोचरीकृत्य स उत्सुकोऽभवत्। सुदाम्ना विचारितम्—उपकारशीलस्य मम मित्रस्य कृष्णस्य मयि सातिशयोऽयं स्नेहः, यन्मया प्रशस्यगुणान्विता रूपसम्पदधिष्ठिता सत्कुलाभिजाता लावण्यमयी च पत्नी प्राप्ता। ससुखं भवतु मे गार्हपत्यमिति कृष्णस्येयं घटनाचातुरी सफला दृश्यते। मयाद्यावधि कृष्णस्य किंचिदुपकृतमिति न स्मरामि। अथवा किं वितर्केण? "सन्तः स्वयं परहिते विहिताभियोगा" इत्युक्तिरवितथा।

कौमुदी सुदाम्नो नागरिकतासम्पत्तिं निशम्य विचारितवती—परिवर्तितोऽयं मे वरेण्यः स्नातकः पूर्वं सरल एव ग्राम-वधूयोग्य आसीत्। किन्तु गार्हस्थ्य-समारम्भेऽधुना अस्य मुखश्रीः लावण्यशोभया प्रकाशते। कृष्णस्य माहात्म्यम्, उपकारशीलत्वं च मामृणीकरोति।

शोभननक्षत्रे वैवाहिकी क्रिया समारब्धा। गर्गाचार्यः सर्वाभरण-भूषितां कौमुदीं समानीय सुदामानमब्रवीत्—

इयं कन्या मम सुता सहधर्मचरी तव।
प्रतीच्छ चैनां भद्रं ते पाणिं गृह्णीष्व पाणिना॥

पाणिग्रहणं कृत्वा सुदामा प्रतिज्ञातवान्—

गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः।
भगोऽर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवाः॥

कौमुदी-सुदामानौ अग्नेः प्रदक्षिणां कृतवन्तौ। समुपस्थिता महाजना वध्वै आशीर्वचनं ददुः—

सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव।
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधिदेवृषु॥

ततः परं सप्तपदी सम्पादिता—'इषे एकपदी। ऊर्जे द्विपदी। रायस्पोषाय त्रिपदी। मायोभव्याय चतुष्पदी। प्रजाभ्यः पञ्चपदी। ऋतुभ्यः षट्पदी। सखा सप्तपदी भव' इति।

वैवाहिकसम्बन्धः ध्रुव-दर्शनेन सम्प्रतिष्ठितः संजातः। सुदामा वैवाहिकीं प्रक्रियां पदे पदे सन्धारितवान्। आश्चर्यं तस्यासीत् 'सम्राज्ञी श्वशुरे भव' इति श्रुत्वा। किन्तु पत्नीरूपेण मम गृहे सम्राज्ञी वत्स्यति। अहं खलु स्वयंसेवकः सुदामा। क्व गतं मे नैष्ठिकब्रह्मचर्यम्, कुतश्चेयं सम्राज्ञी सहधर्मचारिणी समागता? सर्वमिदं कृष्णनियोजनात् स्वन्तमेव सम्भाव्यते। कृष्णः मां कुत्र भ्रामयिष्यति। यद् भूतं तद् भूतम्। कृष्णानुयोजनमपि मम कृते सर्वथा साधु न प्रतिभाति। भाविनि नियोगे सावधानोऽस्मि। इदानीं गृहस्थोऽस्मि संवृत्तः। इमं गुरुभारं गार्हपत्ये कथमहं वोढुं समर्थः?

(१५)

विवाहानन्तरं वधूवरस्य प्रस्थान-समये सौष्ठवपूर्णगार्हस्थ्याय अपेक्षितानि सर्वाणि वस्तूनि दातुकामः गर्गः पञ्चाशत् शकटिकाः सुसज्जीकृतवान्। तासु शकटिकासु वनस्पति-प्राणि - भूगर्भोद्गत - भोज्यसामग्रीः, मधु - पुष्परसभाण्डानि, गन्ध - तैलाङ्गराग - चूर्ण - चन्दनागुरुचित्रण - वासयोग-प्रसाधनादीनि, स्वर्णपत्र-कर्णोत्पल-रत्नावली-कंकण-वलय-रशना-नूपुर-किंकणीकाङ्गुलीयक - तिलकाख्यानि विभूषणानि, उष्णीष-चोल - कूर्पासकोत्तरीयाधोवास - रल्लकादीनि वस्त्रपरिधानादीनि च सन्निधापितान्येव शुशुभिरे। अपरञ्चासीत् रत्नमणि-काञ्चनदानायोजनम्। सवत्सा वस्त्रालङ्कारभूषिता विश्राणनविधावुपनीता माथुर्यो गावः तत्र व्यराजन्त। दासीदाससहस्रं स्वर्णालङ्कारविभूषितं सुदाम्ना सह गन्तुकामं समुपस्थितम्।

गर्गाचार्यः सुदामानमाहूयावदत्—जामातः, इमानि सर्वाणि भवता ग्रहणीयानि। विवाहतिथौ प्रतिवर्षमेभ्योऽधिकतरं भवतोः सम्प्रतिष्ठायै दातव्यमस्माभिः। सुदामा तद्वस्तुजातस्य दर्शनमपि अनिच्छन् साश्चर्यं सविनयं च जगाद—किन्तु नाहमिदं ग्रहीतुमुत्सहे। अस्माकं कुले कश्चित् ब्रह्मबन्धुरपि श्वशुरात् स्वल्पमपि धनं न स्वीकरोति। पुनः पुनरपि श्वशुरेणानुनीयमानोऽपि यदा जामाता कन्यादानमेव बहुमन्यमानः किञ्चिदपरं ग्रहीतुं नोद्यतो बभूव, तदा सकलवैषम्यनिवारकः, समुपायचिन्तनेऽपरो बृहस्पतिरिव कृष्णः समाहूतः। कृष्णसुदाम्नोः तत्प्रकरणमधिकृत्य विवादोऽजायत—

सुदामा—नाहं गृह्णामि काकिणीमपि श्वशुरात्।

कृष्णः—'किन्तु वयं माथुराः अद्य श्वो वा सर्वमिदं जामात्रे दद्मः' इति नागररीतिरस्माकं कुलरीतिश्चाचार्यस्य।

सुदामा—तत्कथं सम्भाव्यते? न वयं गृह्णीमः स्वल्पमपि श्वशुरादिति रीतिः अस्माकं ग्रामस्य काश्यपकुलस्य च। नाहं ग्रामरीतिं कुलरीतिं वा परित्यज्य नागररीतिं ग्रहीतुकामः।

कृष्णः—तत्कथं नामास्माकं जामातृभरणश्रद्धा पूर्यंत?

सुदामा—तर्हि प्रतीकरूपेण देया मे सवत्सा एका गौः। सैव ग्रामरीतिरस्माकम्।

सुदाम्नः सङ्कल्पं दृढं विज्ञाय तदनुरूपं तस्मै गोप्रदानमिति समाधानं कृष्णः सर्वजनविदितं चकार। 'अहो, सात्त्विक-ब्राह्मणस्य महानयमपरिग्रहः। तस्य कौलीनपरम्परानुशीलनं प्रशस्यमेव। अनुकरणीयमेव तस्य परम्परीणमादर्शवृत्तम्' इति आम्नायसारिणः प्रोचुः। 'विधिविधानं प्रोज्झितुं कः समर्थः' इति विचारयन् गर्गाचार्यो गामेकां जामात्रे दत्तवान्।

गर्गाचार्यः कृष्णं रहसि समाहूय स्वमनोगतं प्रकटीकृतवान्—'तत्कथं मे कन्या पतिगृहे ससुखं वत्स्यति? अस्या माता जामातुरपरिग्रहवृत्तिं श्रुत्वा सानुशया वर्तते' इति। कृष्ण आचार्यस्य समाधानमकृत्वैव स्वनिश्चयं व्यक्तीचकार—'अहं तत्सर्वं करिष्यामि येन दम्पती निकामं गार्हपत्यं निर्वहताम्। नायं सुदामा तर्केण पराजितो भविष्यति, अस्माकं मतं स्वापतेयं वा स्वीकरिष्यति। तर्हि यत्कारयितुं बद्धपरिकरोऽस्मि तदचिरमेव कौमुद्याः साहाय्येन सम्पाद-

यिष्येऽहम्। भवान् यथाकथञ्चित् साह्लादमेव वधूवरस्य स्वगृहात्प्रस्थानमायोजयतु' इति।

गर्गः सामि प्रसन्नमानसः दम्पतीप्रस्थाननियोजनेषु व्यापृतोऽभवत्। अत्रान्तरे कृष्णः कौमुद्या सह वार्तालापं कृतवान्। कृष्णोऽकथयत्--'सुदामा निसर्गतः दरिद्रो वर्तते नाम। किन्तु भवत्या दारभावे स शीघ्रमेव समृद्धो भवतु' इति मे मनीषा। नात्रभवतीं परित्यज्य कश्चिदपरोऽस्मिन् कर्मणि सहायो भवितेति विचार्य मयेदं परिणयबन्धनं समायोजितम्। तर्हि करणीयमित्थमिति कौमुद्याः कर्णे कृष्णो मुहूर्त्तं किञ्चिद-व्यक्तमेव जल्पितवान्। पत्युः अपरिग्रहं श्रुत्वा पूर्वतः खिन्नापि कौमुदी कृष्णमन्त्रणया स्मितमुखी प्रोवाच--'साधयिष्येऽहं सौकर्येण यद्भवता नियोजितम्' इति।

(१६)

प्रस्थानात् पूर्वं वधूवरस्य नगरपरिक्रमरीतिमनुसृत्य दम्पती निर्गतौ। तस्मिन्नवसरे मथुरावासिभिः माङ्गलिका-योजनानि समुपस्थापितानि। नगरवीथिषु स्थाने-स्थाने तोरणध्वजादीनां प्रतिद्वारं मङ्गलकलशानां च कापि सुषमा समवर्तत। राजरथमधिष्ठितयोः कौमुदी-सुदाम्नोः आध्यक्ष्ये नगरवधूनां यात्रा मथुराया विविध-भागेषु प्रतिष्ठितानां देवतानां दर्शनाय उपचक्रमे। 'प्रथमं तावत् नगरस्य सांस्कृतिक-संविधानेऽनुत्तमस्थानं लब्धवती पुण्यजला यमुना देवी अर्चनीया' इति सरित्पुलिनदिशि यात्रा बभूव।

यमुना तु सैकतोत्सङ्गसुखोचितानाम्, प्राज्यैः पयोभिः परिवर्धितानां च माथुराणां सामान्यधात्रीव सम्मानिता। तस्या नद्याः पुलिनास्तरणं सुकोमलं कृतमिव दम्पत्योः स्वागतार्थं चकाशे। तत्र प्रकृत्या मयूराणां नर्तनं सम्प्रवर्तितम्। यमुनाकच्छे महामुनीनामाश्रमेषु छात्राणां ब्रह्मघोषोऽश्रूयत। महानद्याः किञ्चित् विचित्रः पुण्यप्रभावः सर्वत्र व्यराजत। तथा हि—तस्याः तीर्थानि साधव इव दर्शनात् मुहूर्त्तसेवया पुनन्ति स्म। तरणितनूजापि सा शीतलजलौघपूर्णा स्नायिनां तापमपहृतवती। यमस्य भगिनी अपि यमुना माथुरेभ्यो जीवनं ददाति स्म। कृष्णजलापि सा निम्नगा दर्शकानामपि पाप-कार्ष्ण्यमपाकरोति स्म।

कौमुदी तु यमुनां जननीमिवामन्यत। विप्रकृष्टापि सा तरङ्गिणी तरङ्गहस्तैः दम्पत्योः आह्वानं कृतवतीव तयोर्मनसि प्रहर्षं जनयामास। उत्पतद्भिरेव नयनमीनैः जातकुतूहला सा पुनः पुनः तयोः सुषमां द्रष्टुकामेवोच्चचाल। दम्पत्योः सभा-जनार्थमिव उपकूलं तीरोद्गतकुसुमानि सा समर्पितवती।

तौ दम्पती यथाविधि यमुनादेव्याः पूजां चक्रतुः। कौमुदी तत्र प्राञ्जलिर्भूत्वा मनसा चकमे—'गार्हपत्यमिदं मे सविलासं शोभनं च भवतु देवि यमुने। त्वां देवि नमस्यामि प्रशंसामि च। केवलमिदमेव तव प्रसादेन मे सिद्धं भवतु यत् मे हृदयेशः स्वदैन्यवृत्तिं विजहातु। स धनधान्यसम्पन्नो भूत्वा गृहस्था-श्रमोचितान् महायज्ञान् सम्पादयतु। अधुना गार्हस्थ्ये प्रवृत्तोऽपि स निवृत्त इवाचरति। हे देवि, सिद्धे हि मानसे, सर्वथा पूर्णकामा प्रमुदिता च मथुरां पुनरागताहं यक्ष्ये।

तस्मिन्नेवावसरे कलकल-निनादेन सह नद्यां राजतमीनसंघः तरलमुच्चचाल। तत् श्रुत्वा दृष्ट्वा च स्वमनोरथोऽचिरमेव पूर्णो भविष्यतीति कौमुदी सुलक्षणमभिमतवती।

सुदामापि विवाह-वैषम्यं सन्धारयन् यमुनां प्रार्थयामास--'देवि, महोदयेन सान्दीपनिना आचार्येण महत्सु नियोगेषु नियोजितोऽस्मि। उच्चेषु नियोगेषु सिद्ध्यर्थमपरिग्रहवत्तेः तपसः साधनायाश्चापेक्षा भवति। न इमे गुणा गृहस्थानां सुलभाः। आचार्यो मम गार्हस्थ्यमपि मेनेऽभीष्टम्। तस्यादेशेनाधुनानिच्छन्नपि गृहस्थोऽस्मि संवृत्तः। तर्हि यदि गृहोचितपरिग्रहेषु आत्मानमनुरञ्जयामि तदा कथं गुरुनियोगं पूर्णं करिष्यामि। पत्नी मे मथुरावासिनी कृष्णस्यानुयोगेन प्राप्ता। सासंशयमेव भोगविलासादिक्रमेषु आजन्मनः परिवर्धिता मां सरलं दृष्ट्वाद्यापि सारल्यं न स्वीकरोति। च्यवनस्य तपश्चरणं दृष्ट्वा तेन परिणीता राजदुहिता सुकन्या स्वयमपि तापसी किं न बभूव? अथवा धृतराष्ट्रस्यान्धत्वं विलोक्य किं न गान्धारी विश्वानुभाविनी नेत्रे सततं पिहितवती। देवि, तथा करोतु येनाहमृषिपथात् विमुखो न भवेयम्। तर्हि गृहस्थानां कृते मनुना प्रमाणितेयं वृत्तिर्मे भवतु—

अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः।
या वृत्तिस्तां समास्थाय विप्रो जीवेदनापदि॥
यात्रामात्रप्रसिद्ध्यर्थं स्वैः कर्मभिरगर्हितैः।
अक्लेशेन शरीरस्य कुर्वीत धनसञ्चयम्॥

भवत्प्रसादात् सिद्धेऽस्मिन् मनोरथेऽहं स्वकीये वानप्रस्थे

भवत्यास्तटे विचरन्नेव तीर्थत्वं संवर्धयिष्यामि इति। सुदाम्नः कामनायाः शुभाशंसनमेव तदा यमुनाकलकलेन सञ्जातम्। झटित्येव कच्छप एकः समायातः काश्यपस्यादर्शं सुदाम्नः प्रत्यक्षमिव व्यदधात् च।

नवदम्पती यमुनादेव्या मनोऽनुकूलाशंसनेन शुभलक्षण-प्रदर्शनेन च प्रसन्नमानसौ बभूवतुः। अनन्तरं सर्वासां नगर-देवतानामर्चनां कृत्वा सुदामा कौमुद्या सह श्वशुरगृहं प्रति-निवृत्तः। गुरुजनैरनुमतौ नागरिकाणामाशीर्वचनं शृण्वन्तौ, प्रणामाञ्जलिना सर्वेषां कृते समादरं प्रकाशयन्तौ च नवदम्पती राजरथारूढौ मथुरातः निर्जग्मतुः।

उत्तरभागः

(१७)

ग्रामीणानामौत्सुक्यं निःसीमं भवति। मथुरातः निर्गमनस्य पश्चात् महापथमभितोऽवस्थितग्रामाणां जनता राजरथस्य ध्वनिं श्रुत्वा सर्वं कार्यंजातं परित्यज्य तद्दर्शनाय संकुलीभूता। तस्मिन् रथे नवदम्पती अवलोक्य जनाः तं दिवसं शोभनममन्यन्त। अनेकशः ग्रामवधूटीसंघो दम्पत्योः ग्राम्यविधिना स्वागतं चकार। तयोः परिचयं प्राप्तुकामा अपि स्त्रियः ह्रिया निर्वतिताः। तथापि दम्पत्योः वेषप्रसाधनादिभिः प्रकाशितमेवासीत् यत् स्नातकस्य वधूः मथुरातः श्वशुरगृहं गच्छति। काश्चित् प्रौढा जिज्ञासव एव कौमुदीमुखात् गन्तव्य-प्रदेशं ज्ञात्वा चकिता बभूवुः। कथमियं मथुरोचितविलासप्रवणा युवती ग्रामे जीवनं यापयिष्यतीति विस्मयोपहतास्ताः स्वकुहतूलं ग्रामवृद्धाभ्यो न्यवेदयन्। ग्रामवृद्धास्तु लोकस्थितिपरिज्ञानपरायणाः स्पष्टमूचुः—अपूर्वोऽयमुद्वाहः। न कदापि दृष्टा श्रुता वास्माभिः माथुरी कन्या ग्रामं गन्तुकामा। तत्कथमियं वधूः सर्वाडम्बरविहीनेषु ग्रामेषु चरणशीलं वरं समचिनोदिति महान् वितर्कः। कन्येयं स्नातिका रूप-गुण-सौन्दर्य-सम्पन्ना सर्वाभरणसमलंकृता कस्मिंश्चित् समृद्धकुले लालितेति निःसंशयम्। तत्सर्वमिदं वैषम्यमसमाधेयम्।

क्वचिद्विधेः विडम्बनाद्वा महोद्देश्याभिसन्धानाद्वा वैचित्र्यमीदृशं सम्भवति। तत्कथं न लक्षितं युष्माभिः यद्ग्रामोन्मुखी अपि वधूः सुप्रसन्ना वर्तते। किमर्थं सुदामायं विद्वानपि ग्रामं ईदृशीं वधूं नयतीति विचारयन्त्योऽपि वयं समाधानं न लभामहे।

क्वचित् नर्मपरायणं यौवतं कौमुद्याः प्रत्युत्पन्नमतिं विनोदप्रियत्वं च तद्विपरीतं सुदाम्नो गम्भीरवृत्तिं परिलक्ष्य नववधूं सपरिहासमेवाकथयत्—भवत्याः शोभनोऽयं पतिः शीघ्रमेव लोकवृत्तिं शिक्षतामिति।

ग्रामात् ग्रामं प्रपथेन गच्छन्तौ दम्पती जनपदसमृद्धिमवलोक्य प्रसन्नौ बभूवतुः। अतः परं ममवासभूमिः ग्रामस्थली एव भविष्यतीति विचार्य कौमुदी जनपदस्य सर्वाणि मनोहारीणि वस्तूनि सावधानमेवापश्यत्। परस्परं संलपन्तौ दम्पती राजपथमुभयतः पश्यन्तौ नगरग्रामयोः उच्चावचत्वं पर्यालोचयताम्। कौमुदी जनपदभूमेः नैसर्गिकसौन्दर्यं परिलक्ष्य सर्वथा मुग्धा एव सुदामानं प्रोवाच—नगरे प्रायशः महाट्टालिकाभिः बाधितं सूर्यदर्शनं मध्याह्ने एव सम्भाव्यते। निशायां सुधांशोः तारकाणां वा दर्शनं तु परिसीमितमेव। तत्र नागरिकाणां कृते ज्योत्स्नाविराजनं केवलं श्रुतमेव। तद्यथा—लतापुष्पादीनामपि तत्र वायु-प्रकाश-प्रसाराभावात् पूर्णसंवर्धनं न संजायते। राजकीयमृगशालासु निरुद्धसंचाराः पराधीना वनजन्तवोऽर्धमृता इव लक्ष्यन्ते। तत्पश्यतु भवान्—अयं पुरतः धावन्नेव हरिणः सविशेषं स्वस्थः प्रसन्नश्च दृश्यते। नागरिकाणां दृष्टिरपि सर्वतः प्रासादानां

भित्तिभिः परिच्छिन्नैव सङ्कीर्णा भवति। प्रासादेष्वपि तत्र हृदय-प्रसादो नानुभूयते । अत्र ग्राम-परिसरेषु सर्वं सातिशय-माह्लादपूर्णं सोल्लासं च वर्तते।

कुतूहलिनी कौमुदी इतस्ततः दृष्टिं विक्षिपन्ती जनपद-प्रदेशानामाकर्षणं सम्भावितवती। तथा हि—ग्रामपथिकानां गोपालानां च संगीतेन तस्या हृदयं सुप्रीतमभवत्। क्वचि-न्महावृक्षा निःशुल्कमेव यात्रिकेभ्यः शरणं भोजनं च ददत उदारा प्रतिभान्ति स्म। क्षेत्राणां हरितत्वेन तस्या नेत्रे शीतलतामवापतुः। जलाशयेषु, विविधवर्णाभरणैः कुमुदादिभिः तस्या दृष्टिः निगडीकृता । शुक-हंस-मयूर-पिक-खञ्ज़न-सारस-नीलकण्ठादयः पक्षिणः, हरिणगोगवयमहिषाश्वहस्तिवराहा-दयः पशवश्च निसर्ग-नाट्यस्य पात्राणीव सरसमाचरन्ति स्म। तत्र महीकामिन्या नीलनेत्राणीव तृणानि नवयौवना-नीव कुसुमितोपवनानि च शुशुभिरे। मन्थररोमन्थनचलित-गण्डो महिषीषण्डः तत्रानुबद्धां शान्तिं परिचाययति स्म। केदारकेषु रसार्द्राणि इक्षुवनानि पवनवशेन प्रनर्तितानि। कणभरपक्वशालिः इतस्ततः विघूतः मत्त इवालक्ष्यत । कृषक-कन्यकाभिः प्रतिषिद्धा अपि शुकाः 'अस्माकमपीदं क्षेत्रम्, अस्य च भागग्राहिणो वयम्' इत्यमुच्चैरुच्चारयन्त इव कणि-शान् चिन्वन्ति स्म। ग्रामस्त्रियः वटप्ररोहेषु दोलायिताः तत्रत्यजीवनस्य महोत्साहं प्रादर्शयन्। कौमुदीकृते तत्र ग्राम-जीवने प्राकृतिकं मानवीयं वा सर्वं प्रेमरसार्द्रमिव प्रतिभातम्। मम जीवनं सुदाम्नो ग्रामे ससुखं भविष्यतीति तयावधारितम्।

(१८)

ग्रामेऽस्मिन् माथुरी कन्या वधूरूपेण समागमिष्यतीति वृत्तान्तेन आबालवृद्धं सर्वेषां विस्मयः समजनि। 'अद्य सर्वमत्र नववधूयोग्यं भवतु' इति विचार्य सर्वे जना मिलित्वा ग्रामस्य निर्मलतां विदधुः। वध्वागमनमुपलक्ष्य प्रातःकालादेव कलकण्ठीप्रमुखाणां विहङ्गानां कूजनस्य संगतौ ग्रामवधूनां संगीतं समारभत। ग्रामवृद्धाः शनकैः आशीर्वादगीतानि जगुः।

दिवसारम्भे समागता नार्यः सुदाम्नो मातरं पुरस्कृत्य ग्रामदेवतानां स्थानेषु गत्वा गीतिभिः नवदम्पत्योरागमनमत्र भविष्यतीति न्यवेदयन्। 'नवदम्पत्योः सर्वविधं कल्याणं भवतु' इति ताः सर्वा अभ्यर्थनां चक्रुः। सकौतुको ग्रामः तं दिवसमुत्सुकतयैव निनाय।

सायङ्काले तत्र रथागमनस्य ध्वनिः दूरतोऽश्रूयत। सर्वे ग्रामबालाः ध्वनिदिशां परिलक्ष्य समुत्सुका भूत्वा अधावन्त। 'को दम्पती प्रथमं पश्येत्' इति तेषां स्पर्धा बभूव। बालदर्शनमेव दम्पत्योः सर्वोत्तमं मङ्गलमिति ग्रामवृद्धैरपि ते न प्रतिषिद्धाः। रथमार्गात् किञ्चिद् दूरमेव तत्र जनसम्मर्दो बभूव। ग्रामवासिनः दम्पत्योः शोभां प्रति समुत्सुका अपि ग्रामरीतिमनुसृत्य विप्रकृष्टा आसन्।

अचिरमेव रथादवतीर्णा लज्जावगुण्ठनवती वधूः स्वर्णरत्नादीनामलङ्कार-समृद्ध्या पितुः कुलस्यैश्वर्यं ख्यापितवती। 'किमियं सुन्दरी देवनिकायादवतीर्णा' इति ग्रामवासिनः विस्मिता बभूवुः।

'स्वकीयेन ज्ञानोत्कर्षेण ब्रह्मबलेन च सुदाम्नः साफल्यमीदृशम्' इति सर्वे युवानः तं सभाजयामासुः। महतां कुले उद्वाहेन अस्माकं ग्रामस्य प्रतिष्ठा सुदाम्ना संवर्धिता इति ग्रामवृद्धाः तं प्रशशंसुः। तथापि—कथमयं जनः दीन एव सुखोचिताया अस्याः सहधर्मिण्याः सम्भरणं कर्त्तुं समर्थो भविष्यतीति चिन्ताकुला आसन्। 'अस्माकं ग्रामरीतिं स्वकुलरीतिं चानुसृत्य सुदाम्ना श्वशुरगृहात् गामन्तरेण किंचिदपि न स्वीकृतमिति वरयात्रिकेभ्यः श्रूयते। अथवा किं वितर्केण ? पूर्वार्जितेन तपसा भाग्योदयेन च सुदाम्नः तादृशी विद्या सम्भाविता। भगवत्कृपया तस्येदृशी वधूः समागता। तत्सर्वमस्माभिरशंसितमेव घटितम्। तत्किमपि विचित्रमपरमपि भविता येन वध्वाः सुखमुत्पत्स्यते। तस्या भाग्येन न केवलं सुदाम्नः, अपि तु सर्वेषां ग्रामवासिनां किञ्चित् शाश्वतं कल्याणं भवेत्।

(१९)

तस्मिन् ग्रामे सुदाम्नो नववध्वाः समागमनकाले सर्वं साह्लादमिवासीत्। तथा हि—नित्यमेव धूलिधूसरिता क्रीडासक्ता अपि बालास्तस्मिन् दिवसे ग्रामसौचिकेन विरचितानि अननुरूपाण्यपि वस्त्राणि सगर्वं परिदधति स्म। अपरिचितस्नानप्रसाधनाभ्यङ्गान्यपि तेषामङ्गानि आ शिरसः पाद-पर्यन्तं तैलचर्चितानि बभूवुः। पूर्वं रजकैरस्पृष्टान्यपि युवकानां वस्त्राणि धावितानि रक्तरञ्जितानि च शुशुभिरे। मासमपि नारीणामसम्पृक्तकङ्कतकेशाः प्रयुक्तक्षारमृत्तिका अपि बहुलप्रयासैः स्वच्छीकृता इङ्गुदीतैलचिक्कणीकृताश्च सीमन्तशोभिनः

व्यराजन्त। तस्मिन्नागरिकसभ्यताविहीनेऽपि सुखशान्तिप्रचुरे ग्रामे तिमिरघननिशीथेऽमायां लक्ष्मीरिव कौमुदी अभ्युदियाय।

सुदाम्नो मातापितरौ परमाह्लादितौ सर्वेषां ग्रामबन्धूनां सम्बन्धिनां च मध्ये परं शोभायमानौ बभूवतुः, तेषां सत्कारार्थं स्वकीयं सर्वस्वं तौ सहर्षमेवार्पितवन्तौ। भोजनदानादिना सर्वे ग्रामीणसेवका वर्धकि-नापित-रजक-हालिकाश्च सन्तर्पिताः। गृहपतेः सौहार्देन ते सर्वे तथा प्रीणिता यथान्यत्राधिकमपि धनं प्राप्य कदापि न बभूवुः।

(२०)

सुदाम्नो गृहे सर्वतो हीनत्वमपि दृष्ट्वा कौमुदी कदापि न विचचाल। धनाभावस्तत्रासीत्, किन्तु कुटुम्बिनां ग्रामवासिनां च सौहार्दसम्पत्त्या तस्याभावस्य पूर्तिः सम्यक् भवतीति सान्वभवत्। तथा हि कौमुद्या मुखश्रीप्रेक्षणाय या ग्रामवृद्धा वध्वश्च समागताः तासां यथारीति नववध्वै प्रीतिदानं तु स्वल्पमेवासीत्, किन्तु स्निग्धमाशीर्वचनं शुभाशंसनं च हृद्देशीयमभवत्।

कुटुम्बिनां ग्रामवासिनां च सुखमभ्युदयं च कथं साधयामीति कौमुदी चिन्तापरायणाभवत्। स्वसुखनिरभिलाषैव सान्येषां दुःखानां दूरीकरणे व्यापृता सती सुदाम्नो दारिद्र्यं क्लेशकरं न मेने। तस्या मनसि वितर्कः समजनि, तद्यथा—

ग्रामपरिसरे सर्वं चराचरं शोभनं स्वस्थं सोल्लासं च दृश्यते। ग्रामे सर्वे सौहार्दपूर्णा निश्छलाश्च प्रतिभान्ति। तथापि न्यूनत्वमेकमेवात्र मया परिलक्ष्यते। नेमे ग्रामवासिनः

समृद्धिपरायणाः। न ते स्वभोजनस्य वैविध्यमास्वाद्यत्वं वा कांक्षन्ति। न ते उच्चभवनानां निर्माणार्थं समुत्सुकाः सन्ति। वस्त्रादीनां कृतेऽपि तेषां चिन्ता न भवति। ग्रामस्य स्वच्छतां विधातुं ते विचारमपि न कुर्वन्ति। 'तर्हि किं कर्तव्यं ग्रामस्याभ्युदयाय' इति महान् प्रश्नो मया समाधेयः।

(२१)

कौमुदी पूर्वतः कदापि ग्राम्य-स्थितीनां ज्ञानं न लब्धवती। तथापि ग्रामाणां साधारणदोषा अनायासं तस्या मनसि प्रतिभाताः—तत्प्रथमोऽयं दोषो यद् ग्रामवासिनः परं सन्तुष्टा एव दोषाणां विचारमपि न कुर्वन्ति। तेषां धारणैव प्रतीयते यत् ग्रामोचितं हि सर्वमिदं दारिद्र्यं मलिनत्वं, शिक्षाविहीनत्वं च। अत्राध्ययनयोग्या बालकाः पाठशालां न गच्छन्ति। ते इतस्ततः भ्रमन्तः क्रीडन्तो वा दिनानि यापयन्ति। युवकास्तु क्षेत्रेषु परिश्रमशीला दृश्यन्ते, किन्तु ग्रामं प्रविश्य ते श्रान्ता इव किञ्चिदपि ग्रामाभ्युदयाय न कुर्वन्ति। यदि नाम ग्रामवासिनां प्रवृत्तिः ग्रामाभ्युदयाय भवेत् तर्हि नातिश्रमेण ग्राम-दशा समाधेया स्यात्। इमे ग्रामवासिनः शक्तिशालिनः परिश्रमपरायणाश्च सन्ति। अन्यथा क्षेत्रेषु ईदृशी शस्यसम्पत्तिः कथं स्यात्? मार्गे मयानेकशः कृषकाणां कर्मण्यता परिलक्षिता। तद्यथा—बहवो हलधरा मध्याह्नेऽपि स्वेदसिक्ता एव क्षेत्राणां कर्षणे व्यापृता भवन्ति। ते प्रातःकाले गृहात् निर्गत्य सायङ्कालपर्यन्तं क्षेत्रेषु कठोरं शारीरिकश्रमं कुर्वन्ति। अन्यत्र शस्यानां पोषणाय उदञ्चन-चालनेन कृषीबला अहर्निशमालवालापूरणं कुर्वन्ति। हेमन्तेऽपि

शयनादुत्थाय प्रातःकालतः शीतालुभिः हस्तपादैः ते इक्षुक्षेत्रेषु काण्डपत्राणि अपाकुर्वन्ति। तस्मात् कालादारभ्य सकलं दिनं सपरिश्रमं गुडनिर्माणं कुर्वन्ति। न हि तेषां कर्मणि कश्चिद्दोषो मया लक्ष्यते। यत्किञ्चित् पुरुषाः कुर्वन्ति तत् सर्वं शोभनविधिना सम्पादितं दृश्यते। ग्रामपरिसरे सर्वं स्वर्गीयमेव तेषां कृषकाणां कृतकार्यतां व्यनक्ति। किन्तु ग्रामाभ्यन्तरं सर्वं दुर्दर्शनीयं तेषां जीवन-रसोपेक्षां निदर्शयति। ग्रामस्यान्तरिकस्थितिः यथा प्रसादमयी भवेत् तथा प्रयतनीयं मया। अस्मिन् कार्ये स्त्रीणां साहाय्यं महत्त्वपूर्णं भविष्यति। नेमाः स्त्रियः शिक्षिताः। 'कथं नाम ग्रामोऽयं सुदर्शनो भवतु' इति ग्रामीणस्त्रियः कदापि न पर्यालोचयन्ति।

(२२)

सुदामा कौमुद्या ग्रामाभ्युदयविषयिकां चिन्तां श्रुत्वापि निरपेक्षोऽवर्तत। स ग्रामवासिनामाध्यात्मिकीमुन्नतिं कर्त्तुमियेष। तेन विमृष्टम्—अस्मिन् ग्रामे बहवः दोषाः सन्ति। यदि ग्रामस्याभ्युदयकर्मणि व्यापृतोऽहं भवेयं तर्हि गुरुणादिष्टं राष्ट्रिय-चरित्रनिर्माणात्मकं कर्म कथं सम्पादयिष्यामि? ग्रामस्याभ्युदयचिन्तायां काचित् हानिः नास्ति। तथापि व्यासवचनानुसारं मया व्यवहर्तव्यम्—

'त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्॥'

अहं तु आध्यात्मिकपथेन सर्वजनहितं साधयितुं ग्रामार्थपरित्यागं समीचीनं मन्ये। ग्रामस्योन्नतये कौमुदी यत्नं

करिष्यतीति वरम्। ग्रामकर्मणि व्यापृता सा यदि मम सहयोगं वाञ्छेत्, तर्हि मया स्पष्टमेव व्याख्यातव्यम्—ग्रामस्याभ्युदययोजनानि त्वया स्वयमेव सर्वथा सम्पादनीयानि ग्रामाभ्युदयमिच्छन्नपि नोत्सहे तस्यां दिशि स्वशक्तिं नियोजयितुम्। मम समक्षमाचार्यादेशो वर्तते यमनुसृत्य मयान्यत्र श्रमः विधातव्यः। तथापि 'ग्रामेऽस्मिन् तव प्रयत्नेन सर्वे सुखिनः स्वस्थाश्च भवन्तु' इति मेऽभिप्रायः। तव ग्रामकल्याणवृत्तिं पर्यालोच्य प्रसन्नोऽस्मि यत्किञ्चित्करणीयं साहाय्यपरं मम विद्येत तदवश्यमेव त्वया विज्ञाप्योऽस्मि। सर्वं तत् करिष्यामि येन तव समारम्भाः सफला भवन्तु।

आवाभ्यां किं कर्तव्यमिति सुदामा कौमुदी च मिथो मन्त्रयित्वा निश्चितवन्तौ। 'सर्वेषां कल्याणमावयोः प्रयत्नैः भवतु' इति सन्धार्यापि तौ विभिन्नकार्यपद्धतिं स्वीकृतवन्तौ। गार्हस्थ्योपभोगोचितान् चिरसञ्चितसङ्कल्पान् विहाय कौमुदी सर्वेषां सुखेन स्वकीयं सुखं मन्वाना आदौ तं ग्रामं सुखिनं कर्त्तुं प्रायतत। सर्वेषां पूर्णश्रमैः ग्रामेऽस्मिन् धन-धान्यसमृद्धिः भविष्यति, ज्ञानप्रदीपैश्च सर्वमपि मलिनं दूरं गमिष्यतीति सा मनसि कृतवती 'सर्वेषामाध्यात्मिकोन्नतिः विधेया' इत्याचार्यादेशमनुसृत्य सुदामा ऋषीणामाश्रमव्यवस्थां स्वीचकार।

(२३)

'गृहाश्रमेण मया भारतस्य सर्वेषां गृहस्थानां चारित्रिकाभ्युत्थानाय प्रयतनीयम्—इति वेदप्रदीपेन गृहस्थानां कृते जीवनादर्शपद्धतिः प्रकाशिता भवतु' इति च समाधाय सुदामा

स्वग्रामस्य नातिदूरमेव सुरम्यभूभागे आश्रमवसतिं कर्त्तुमनाः स्थानचयनार्थं भ्रमणं चकार। तस्मै प्रयोजनायानुत्तमा भूमिः शीघ्रमासादिता । ग्रामेभ्यः क्रोशादन्यूनं दूरं सुखोदकाया नद्याः कच्छे मनःप्रह्लादजननः, सुखशाद्वलः, शीतमारुतसंयुक्तः, पुष्पितैः पादपैः कीर्णः, विहगैर्नादितः, सुखच्छायः सर्वर्तुकुसुम-वृक्षैः समावृतः वनोद्देश आसीत्। तत्र ग्रीष्मर्तोः सन्तापो नासीत्, गवार्थं प्रचुरं यवसमविद्यत, हवनाय समिधोऽजायन्त, विद्यार्थिनां स्नानाय नद्यां तीर्थानि सुतरण्यासन्।

स्थानस्य रमणीयत्वेन भावितः सुदामा निकटवर्ति-ग्रामप्रमुखाणां तत्र सभामेकामायोजितवान्। सुदाम्नः शील-गन्धः सर्वासु दिशासु तेषु ग्रामेषु च प्रागेव प्रसृत आसीत्। प्रमुदिता एव पञ्चाशत्प्राया ग्रामवृद्धास्तत्र समागताः। तेषां समक्षं सुदामा स्वाभिप्रायं व्याकरोत्। तद्यथा—'भवतामा-शीर्वादैः सौभाग्यमिदं मम समभवत् यदहमुज्जयिन्याः परिसरे आचार्यमिश्राणां महर्षिसान्दीपनीनां चरणे साङ्गवेदादीनां शिक्षां प्राप्तवानस्मि। आचार्याणां प्रभावैः समाकृष्टोऽहं तेषां सङ्गतौ यावज्जीवनं संवस्तुमैच्छम् तदा समादिष्टोऽ-हमाचार्यपादैः गृहस्थाश्रमिणामुपकाराय । तदनुसृत्येदानीं गृहस्थोऽस्मि संवृत्तः भवतां मध्ये संवासाय। इयं भूमिः मया ब्रह्मचारिणां कृते आश्रम-संस्थापनार्थं वृता। आश्रमेऽ-स्मिन् दूरतोऽपि विद्यार्थिनः समागमिष्यन्ति। भवन्तोऽपि स्वकीयग्रामाणां विद्यार्थिनोऽध्ययनाय ममान्तिके प्रेषयन्तु' इति। सुदाम्नः शीलेन, शान्त्या, भाषण-माधुर्येण च आवर्जितास्ते सर्वे स्वकीयान् पुत्र-पौत्रान् तत्राश्रमे प्रेषितुकामा बभूवुः।

नैतावता परितुष्टास्ते सुदामानं प्रार्थयामासुः—भगवन्, अस्मादृशानां वृद्धानामपि कृते भवता किमपि करणीयमित्यपि सान्दीपनिनाचार्येण कथं न समादिष्टो भवान्। अस्माकं पुत्रादीनध्यापयन्नेव भवानस्माकं महान्तमुपकारं विदधाति। तथापि कश्चिदन्योऽप्युपायो भवता संचिन्तनीयः, येन जीवन-पारावारे पुनः पुनः निमज्जनशीला वयमपि भवता प्रदत्तया ज्ञानतरण्या समुद्धृता भविष्याम इति। 'एषां निवेदनमाचार्याणामादेशानेकूलमेव वर्तते' इति संचिन्त्य 'यथाकालं स्वयं भवतां ग्रामेषु गत्वा गृहस्थाश्रमोपयोगिनीं जीवन-चर्यां व्याख्यास्यामि' इति सुदामा प्रतिश्रुतवान्। तथाविधां कार्यपद्धतिं स स्वीचकार।

(२४)

शीघ्रमेव तस्मिन् नदीकच्छे वनात् काष्ठपर्णादीनां संग्रहं कृत्वा विद्यार्थिनः पर्णशाला निर्मितवन्तः। शनैः शनैः विद्यार्थिनां संख्या समवर्धत। अभिनवविद्यार्थिनां कृते पुरातनविद्यार्थिनः सहायका भूत्वा आवासादिव्यवस्थां कृतवन्तः। समीपवर्तिप्रदेशानां समृद्धिशालिनः महाजनाः सुदाम्न आश्रमस्य व्यवस्थां श्रुत्वा तत्र पालनार्थं गोव्रजान् प्रेषितवन्तः। अचिरमेव नदीकच्छे विद्यार्थिनामेका शोभना वसतिः समजायत।

अहो प्रभावो ब्रह्मचर्यस्य। आश्रमेऽस्मिन् न भवति भोग-विलासादीनां कृते धनस्य काचिद् व्यपेक्षा। भोजनवस्त्रावासमपि सरलमेव सरलतयोपलभ्यते। तथा हि—वनप्रदेशे कृषिमुपवनं च पालयन्त एव विद्यार्थिनः स्वास्थ्यप्रदमन्नमूलफल-शाकादीनामुपार्जनं कुर्वन्ति। वस्त्रार्थं कार्पासस्योत्पादनं

भवति । मुहूर्त्तमपि प्रतिदिनं तर्कुलचालनेन विद्यार्थिनः न केवलं स्वकीयवस्त्रार्थं सूत्रमुत्पादयन्ति, अपि तु गुरूणां कृतेऽपि तैः वस्त्रं निर्मीयते। वनवृक्षेभ्यः वल्कलानि प्रचुरं प्राप्यन्ते । वृक्षाणां शाखापत्रादिभिः तेषामधस्तात् रचिताः सुशरणाः पर्णशाला न केवलं विद्यार्थिनां वर्षाशीतोष्णादि-बाधा हरन्ति, अपि तु तत्रत्याः पशु-पक्षिणोऽपि तासु सुसुखं वसन्ति । रमणीयस्थलीषु विचरन्त्यः निवासिभिश्च सप्रेम पालिता गावः द्विगुणं पयः संवर्धयन्ति। सत्यं हि तत्र गावः पयस्विन्यः। तासां दुग्धं तु जलादपि अधिकतरं पीयते आश्रमवासिभिः । सर्वत्र स्वच्छताविधानेन नद्या जलं समधिकं सुस्वादु वर्तते। तत्र सर्वाणि वन्यानि अहमहमिकयेवाश्रमवासिनां सुसेवां कर्त्तुमुद्यतानि प्रतिभान्ति। तत्र मयूराणां नर्तनस्य, कीराङ्गनानां सङ्गीतस्य, मृगाणां धावनस्य, शाखामृगाणां प्लवनस्य च स्पर्धासु ब्रह्मचारिणामाचार्याणां च मनोरञ्जनं भवति । लतावृक्षवनस्पतिगुल्मकुञ्जादीनामधिकाधिकपुष्पफलवैपुल्यस्य स्पर्धा आश्रमवासिनां प्रकामसुखलाभाय संजायते ।

आश्रमेऽस्मिन् विद्यार्थिनां चित्तवृत्तिः सांसारिकचिन्ताभ्यः पराङ्मुखी सती केवलं ब्रह्मपरा वर्तते। यमनियमासनप्राणायामपरायणा ब्रह्मचारिणः न केवलं शरीरेण मनसापि च स्वस्था दृश्यन्ते। तेषामध्ययन-निष्ठा अनुपमा भवति। स्वल्पेन कालेन वेदविद्यादिभिः सह शिल्पादीनां शिक्षाग्रहणं सुकरं भवति तेषाम् ।

शनैः शनैः आचार्यकुलस्य ख्यातिः भारतस्य विविध-

भागेषु प्रसृता। 'अत्र निःशुल्कं चातुर्वर्ण्यस्य विद्यार्थिनां कृते सर्वोत्तमा शिक्षा दीयते' इति आ हिमालयात् समुद्रपर्यन्तं सर्वेभ्यः प्रदेशेभ्य विद्यार्थिनोऽध्ययनाय तत्र समागताः विप्रर्षिः सुदामा दशसहस्रविद्यार्थिनामन्नदानादिपोषणात् च कुलपतिर्बभूव।

तस्मिन् आश्रमे आचार्याणामुपाध्यायानां च संख्या नातिचिरमेव संवृद्धा। कुलपतिः नित्यमेव विद्यार्थिनां दशसहस्रेषु प्रत्येकमनुचिन्तयति स्म। कीदृशेन संयमेन कस्यचित् विद्यार्थिनः समुदयो भविष्यति, कस्य वा विद्यार्थिनोऽपायमुखी प्रवृत्तिः कथं निरोद्धव्येति अलौकिकेन केनचित् प्रतिभासेन समाज्ञाय स सर्वेषां चरित्रस्य विकासार्थमुपायं चकार। सुदाम्नो दर्शनेन पादस्पर्शनेन च विद्यार्थिनां काचिदनिर्वचनीया शक्तिः बोधश्च समजायेताम्, यतस्ते सदैवाभ्युदयोन्मुखाः संजाताः। पारस्परिकसौहार्देन सम्पृक्ताः सर्वे ज्येष्ठविद्यार्थिनोऽवराणां साहाय्यं कुर्वन्ति स्म। तस्मिन् आश्रमे कश्चिदव्यक्त एवोत्थान-जागरण-बोधमयः प्रभावः समवर्तत।

(२५)

यथा सुदाम्नः परिश्रमेण नद्याः तटे आश्रमवसतिः समभवत् तथैव कौमुद्याः कल्पनया सुदाम्नो ग्रामे स्त्रीणां संस्थाः संवर्धिताः। अचिरमेव तत्र महत् परिवर्त्तनं समजनि। तथा हि—कन्यकानां कृते एका पाठशाला प्रवर्तिता। तत्रान्येभ्यो ग्रामेभ्योऽपि कन्यकाः पठितुं समागताः। ग्रामवधूनां कृते प्रौढा शालोद्घाटिता, यत्र संकलिता युवतयः पुराणेति-

हासादीनां कथामशृण्वन् । वधूभ्यः संगीतशिल्पादीनां शिक्षा कौमुद्या स्वयमेव प्रादीयत। शनैः शनैः तासां वधूनां अवबोध-परिधिः विस्तृतोऽभूत्। ताः स्त्रियः गृहस्यालङ्करणाय चित्रणं मूर्तिनिर्माणं च स्वयमेव कर्त्तुं प्रारभन्त। पुरा कलकण्ठ्योऽपि ताः स्त्रियः ग्रामगीतान्येवागायन्, किन्तु कौमुद्याः सुशिक्षणेन देवानामर्चनां विधातुं प्रकृतेः देशकालानुरूपं स्वकीयं विलासं निवेदयितुमेव ताः शास्त्रीयसंगीतं प्रायोजयन्।

स्वाभाविको भवति संवादः जनस्य विविधप्रवृत्तीनाम्। संगीत-शिल्पादिषु सुशिक्षिता नार्यः ग्रामस्य स्वच्छीकरणे स्वत एव व्यापृता बभूवुः। तस्मै प्रयोजनाय सर्वासां ग्राम-स्त्रीणामेका सभा समायोजिता। तत्र कौमुदीं प्रधानपदे प्रति-ष्ठाप्य ताः स्त्रियः 'ग्रामस्य सौष्ठव-विधानं कथं सम्भवेत्' इति विषयं पर्यालोचयन्ति स्म।

'आसां मनसि ग्रामस्य दुर्दर्शनीयतामपाकर्त्तुं विचारः स्वेच्छातः संजातः' इत्यवधार्य कौमुदी प्रहृष्टा बभूव। सा सभायां प्रधानपदमधिष्ठाय प्रावोचत्--ग्रामाणां स्वच्छीकरणं प्रायशः स्त्रीभिरेव साधनीयम्। स्त्रिय एव ग्रामेषु नक्तंदिवं वसन्ति। पुरुषाणां मनोरञ्जनार्थं ग्रामाद् बहिः नैसर्गिक-सौन्दर्यमपि भवति नाम। ग्रामाद् बहिर्यत् किञ्चित् कमनीयं वर्तते, तस्य सर्जने संवर्धने च पुरुषाणां शक्तिः बुद्धिश्च पर्याप्तं सफला वर्तते। तत्र शस्यश्यामला अन्नदात्री च भूमिः तैः पुरुषवर्गैः समलंकृता। क्षेत्रेषु परिश्रमं कुर्वन्तस्ते श्रान्ता भवन्ति। ग्रामे आगत्य पुनरपि ग्रामस्यान्त-रिकदुःस्थितीनामपाकरणाय तेषु शक्तिरवशिष्टा एव न

स्यात्। तर्हि सुशोभनो युष्माकं विचारः स्वयमेव ग्रामाणां स्वच्छीकरणस्य।

'प्रथमं तावत् ग्रामाणां मलिनत्वमेवापसारणीयं वर्तते' इति सर्वासां सम्मतिरभवत् । कथमिदं साधनीयमिति विचारणे मलिनत्वस्य कारणानि तेषामपाकरणस्य योजनाश्च निर्धारिताः । तथा हि—ग्रामीणा जनाः स्वशरीरस्य स्वच्छतां विदधतोऽपि ग्रामस्य निर्मलतां प्रति प्रमादपरत्वेन निश्चिन्ता दृश्यन्ते । यथा पुरुषस्य शरीरं भवति तथैव ग्रामदेवताया ग्राम एव शरीरम्। तस्या देवताया मलिनत्वं मा भवतु' इति कौमुद्या व्याख्यातम्।

ग्रामस्येदृशं देवतात्मकस्वरूपं प्रथमवारमेव तासां स्त्रीणां समक्षं पुरस्कृतमासीत्। 'ग्रामदेवतायाः प्रसादनाय भक्त्या विमलात्मना च प्रयतनीयम्' इति सर्वासां स्त्रीणामैकमत्यमभवत्। स्वयमेव किञ्चिदपि तन्न करणीयं येन ग्रामशरीरे मलिनता संजायेत। 'गृहा अपि देवताः, तेषां निर्मलत्वं स्वशरीरवत् विधेयम्' इति सिद्धान्तितम्। प्रातःसायं गृहाणां मार्जनं कृत्वा किट्टादिकं यथास्थानं अवस्करकूटे प्रक्षेपणीयम् 'गृहेभ्यः जलनिस्सारणाय प्रणालीनां निर्माणं करणीयम्' प्रथमं धनिका एवं कुर्वन्तु. तदनु साधारणजना अनुकरिष्यन्ति इति निश्चितम्। पशूनां व्यवस्था तु कठिना इति सन्धारितं सर्वाभिः। ग्रामेषु मनुष्यसंख्यातः पञ्चगुणा पशूनां संख्या वर्तते। ग्रामाणां मलीमसत्वं पशुभिरेवाधिकतरं क्रियते। 'अस्ति कश्चिदुपायो येन पशवो ग्रामेषु नागच्छेयुः' इति कौमुद्याः पृच्छासीत्। 'अस्य विकटानुयोगस्य समा-

धानं पुरुषाः कुर्वन्तु' इति पुरुष-सभायां विचारार्थं प्रेषितमिदमावेदनम्।

(२६)

अपरेद्युः ग्रामस्य सर्वेषां वृद्धानां प्रौढानां च सभा समायोजिता। तत्र प्रायः सर्वे वयोधिका जनाः समागताः। प्रथमं तावत् नारीसभायां निर्णीताः कल्पाः तदनुरूपाः कार्यपद्धतयश्च श्राविताः। ग्रामस्वच्छीकरणस्य वार्तया ते सर्वे हृष्टमानसा बभूवुः। ते पशूनां ग्रामाद् बहिर्वासस्य सम्भाव्यतां विचारयन्ति स्म। कश्चिद् ग्रामवृद्धः प्रोवाच—

'पशूनां निवासायास्माकं क्षेत्रप्रदेश एव चयनीयः। तत्र क्षेत्राणां मध्ये पत्रकाष्ठादीनां कुटीरेषु पशूनां वसतिर्भवतु। क्षेत्राणां मध्ये पशूनां वासेन तेषां गोमयादीनां सर्वथा सर्वोत्तमोपयोगः भविष्यति, सरलतया च क्षेत्रेभ्यः तृणकाण्डादीनां भोजनमपि पशुभ्यः तत्र प्रदेयम्। क्षेत्रेषु मशकदंशादिभ्योऽपि पशूनां भयं स्वल्पं भविष्यति। इयं योजनास्माकं पशुपालनश्रमस्य स्वल्पीकरणाय सम्पत्स्यते। तस्यां स्थितौ क्षेत्रमध्येऽस्माकमपि संवासोऽधिकतरः भविष्यति। ततोऽस्माकमवधानं कृषिं प्रति वर्धिष्यते। अपरं च, हरितक्षेत्रेषु संवासेनास्माकं स्वास्थ्यलाभः चित्तशान्तिश्च सम्भवतः' इति।

तत्रभवतो ग्रामवृद्धस्य कल्पः सर्वैः समर्थितः। अचिरमेव सर्वे गृहस्थाः स्वपशूनां वासाय स्वकीयक्षेत्राणां मध्ये पृथक्-पृथक् आश्रमानिव कुटीरान् निर्माय तत्रैव स्वयमपि

वस्तुं समारब्धवन्तः। केवलं भोजनार्थं ते ग्रामेषु समागताः। ईदृशैः स्वच्छीकरणोपायैः न केवलं मनुष्याणाम्, अपि तु पशूनामपि स्वास्थ्यं तस्मिन् ग्रामे सुष्ठु सञ्जातम्।

अचिरेण तस्मिन् ग्रामे सर्वं भव्यतरं बभूव। तथा हि—स्वच्छीकरणयोजनया किट्ट-मल-पङ्क-जम्बाल-कल्कादीनामभावात् सरीसृप-वृश्चिक-दंश-मशकादीनामभावः, पुराणेतिहास-निबद्धानां देवर्षिमहापुरुषादर्शानां संकथाभिः परस्परसौमनस्योदयः, नियमितभोजनपानव्यवस्थया आरोग्यम्, ग्रामोचितज्ञान-विज्ञान-प्रकाशनेन जनानां निर्भीकत्वम्—सर्वमिदमपूर्वमनुपमं च समभवत्।

दूरदूरतोऽपि जनाः तस्य ग्रामस्याभ्युदयं श्रुत्वा 'कथं कीदृशं चेदं संवृत्तम्' इति जिज्ञासमाना ग्रामनिरीक्षणाय समागच्छन्ति स्म। 'कौमुद्या योजनाभिः तीर्थीकृतोऽयं ग्रामः' इति सर्वे तां प्रशशंसुः। स ग्रामः तस्य जनपदस्याभ्युदयकेन्द्रं बभूव, यतः कौमुद्या सुशिक्षिता ग्रामकन्यका अपरेषु बहुषु ग्रामेषु परिणीता एव तत्र स्वप्रयत्नैः सर्वाङ्गीणामुन्नतिं कर्त्तुं समर्था आसन्।

(२७)

'ग्रामीणजनताया दारिद्र्यं तु दुर्निवारणीयम्' इति कौमुदीमनः सोत्कण्ठमासीत्। 'कथं नाम दरिद्रता ग्रामेषु स्थिरीभूता, यद्यपि ग्रामिका ईदृशं कठिनं श्रमं कुर्वन्ति' इति कौमुदी चिन्तयति स्म। 'मथुरायां साधारणतः जनाः स्वल्पमपि श्रमं कुर्वाणा अपि प्रायशः धनिकाः सन्ति।

विपणौ वाग्मितया व्यवहरन्तः पण्याजीवाः समृद्धिशालिनो दृश्यन्ते। ग्रामीणाः कृषकाः स्वशिरसि घृतभाण्डानि निधाय मथुरायां स्वल्पेन मूल्येन शुद्धातिशुद्धं घृतं विक्रीणते। स्वयं हि क्वचिदपि ते घृतपक्वभोजनं कुर्वन्ति। ग्रामेषु यत्किञ्चिदुत्कृष्टमन्नपानं नितान्तपरिश्रमैरुत्पाद्यते, तत्सर्वं प्रायशः नागरिकाणामुपभोगाय ग्रामाद्बहिर्नीयते। अतः कर्मण्या अपि ग्रामिका दरिद्रा मलिनवस्त्राश्च दृश्यन्ते। शारीरिकश्रमं स्वल्पमेव कुर्वन्तोऽपि नगरवासिन ऐश्वर्यशालिनः, आधिभौतिकसुखप्राचुर्यविलासिनश्च सन्ति। तन्मया किं कर्त्तव्यं येन ग्रामिकैरुत्पादितानि वस्तूनि तेषामेवोपभोगायावतिष्ठन्ताम्। ग्राम्यजना नगरेषु गत्वा तत्रत्यं चाकचक्यं दृष्ट्वा विमूढाः सन्तः तदर्थं सर्वस्वमात्मनः मा ददतु। अस्ति कश्चिदुपायो येन नगरवासिनां धनं ग्रामं प्रति प्रवहेत्' इत्यासन् कौमुद्या मनोवितर्काः।

विचारपरायणा कौमुदी ग्रामस्यार्थिकदशां सम्यगधीतवती। 'यावत् ग्रामीणा जीवनोपयोगीनि सर्वाणि वस्तूनि स्वयं नोत्पादयिष्यन्ति, तावत् ते नगराश्रिता एव नगरवासिभिरतिसन्धास्यन्ते' इति निष्कर्षमवाप सा। अपरं च—स्वर्णरजतादीनामाभरणार्थं ग्रामवासिनः नगरेषु गत्वा बहुधनस्य अपव्ययं कुर्वन्ति। प्राकृता ग्रामीणा जना अलङ्काराणां क्रये प्रायशः वञ्चिता एवाधिकं धनं दत्त्वापि कृत्रिमालङ्कारं क्रीणन्ति। ग्रामेऽस्मिन् वस्त्रोत्पादनेन परिधानार्थं जनान् स्वावलम्बिनः कारयिष्यामि। अलङ्कारास्तु स्वर्णादीनां ग्रामीणजनतायाः परम्परागतामन्धरूढिं निदर्शयन्ति। कथमहं

पूर्णकामा भवेयम् ? 'अतः परं ग्रामवासिभिरेवोत्पादितानि वस्तूनि ग्रहीष्यामि नान्यानि' इति व्रतं सा स्वीचकार।

(२८)

'कौमुदी स्वयं नूतनं चक्रं चालयित्वा सूत्रसर्जनं करोति' इति संवादः तस्मिन् ग्रामे विद्युद्वत् प्रसृतोऽभवत्। 'कीदृशमिदमतीव सूक्ष्मं सूत्रं कौमुद्या निष्पादितम्' इति द्रष्टुं पूर्वतः एव सूत्र-सर्जने व्यापृता अपि स्त्रियः समागताः। ताभिः स्त्रीभिः निष्पादितं सूत्रमसमं स्थूलं चाभवत्। तादृशेन सूत्रेण निर्मितं वस्त्रं भारपूर्णं सुरुचिविहीनमेवापरिधेयमासीत् नवयुवकानां कृते। कौमुद्या आदर्शं स्वीकृत्य सर्वा ग्रामवधूटयः 'स्वकीयैः सूत्रैर्निष्पन्नं वस्त्रं धारयामः' इति कृतसन्धाः स्वयं नवीनं चक्रं चालयित्वा नित्यं सूक्ष्मतरं सूत्रं निर्ममुः। ईदृशैः सूक्ष्मसूत्रैर्निष्पन्नं वस्त्रं सर्वेषां मनो जग्राह। अचिरादेव नागरिकशिल्पकाराणां वस्त्राणि तत्रत्यजनैः परित्यक्तानि।

कौमुदी स्वल्पानि आभरणानि परिदधाति स्म। तस्या आदर्शेन भाविता बहवः नवयुवत्य आभरणानां स्पृहां तत्यजुः। तथापि तस्मिन् ग्रामे आभरणार्थमधिकतमं व्ययं दृष्ट्वा कौमुदी नारी-सभायां ग्रामस्य दारिद्र्यं विवृण्वती प्रोवाच—आभरणेभ्यो युष्माकं रुचिः सातिशया वर्तते। तेषां कृते बहुधनं युष्माभिः नागरिकेभ्यो वणिग्भ्यो दीयते। तत् धनं स्वकुलस्य कुटुम्बस्य चाभ्युत्थानाय किं न व्ययीक्रियते युष्माभिः ? किं न दृष्टा युष्माभिः नागरिकस्त्रियः स्वल्पाभरणा अपि सुवस्त्रैः पुष्पमालाभिश्चातीव शोभन्ते। भाररूपं सर्वमिद-

माभरणं युष्माकं बन्धनमिति नारीणां पारतन्त्र्यं व्यनक्ति। पुरा नार्यः दासीकृता अन्यत्र न पलायेरन् इति रजतस्वर्णालङ्कारभारैः ता निगडिताः। अलङ्काराणामीदृशमितिहासं विज्ञाय सुसंस्कृताभिः नागरीभिः सूक्ष्ममाभरणं धार्यते। किं नाम सौन्दर्यं केवलं स्वर्णरत्नरजतमयैरलङ्कारैः संजायते? सौन्दर्यं तु साक्षादेव प्राकृतिकवनलतावृक्षाणां पुष्पैः फलैर्वावधार्यते। युष्माकमपि सौन्दर्यप्रसाधनं वनमालाभिः पुष्पालङ्कारैश्च भवतु। तथा हि शिरसि पुष्पावतंसः, सीमन्ते नीपपुष्पम्, चूडापाशेषु नवकुरबकपुष्पम्, अलकेषु बालकुन्दपुष्पम्, मौलौ पुष्पमाला, कर्णे शस्यकणिकाश्च. कथं न शोभन्ते नितराम्। पुष्पालङ्काराणां रूपं नित्यमेव नवं नवमित्यपि वैशिष्ट्यं तेषां सौरभेण सहातिशयं स्पृहणीयम्। एतैः परिधायिनां सुरुचिः व्यज्यते। कथं नाम तदेवाभरणं स्वर्णमयमपि अद्य, श्वः, परश्वोऽपि धार्यमाणं युष्मभ्यं रोचते। अनन्यसाधारणाभरणधारणैः यदि यूयं स्वकीयं गौरवं दर्शयितुकामाः, तर्हि सापि शोचनीया वृत्तिः। न कश्चिज्जनः रत्नालङ्कारादिभिः चीनांशुकादिभिः वा महान् भवति। चित्तवृत्तेः सुसंस्कृतिरेव नरस्य महत्त्वं व्यनक्ति। सैव चित्तवृत्तिः प्रशंसनीया या महत्सु कर्मसु कमपि पुरुषं नियोजयति। केवलं प्राकृतजना आभरणैरात्मानमलङ्कर्तुं वाञ्छन्ति। सुसंस्कृतास्तु आध्यात्मिकं गौरवमेव माहात्म्यस्य कारणं मन्यन्ते।'

कौमुद्या अनुभावस्य किमप्यपूर्वं वैशिष्टयमासीत्। 'न केवलं व्याख्यानं ददाति, अपि तु स्वविचारानुरूपं जीवनपद्धतिं स्वीकरोति' इति विचारयन्तीनां नारीणां तस्या भाषणं

मनो दृढं जग्राह। चित्तवृत्तेः शोधनमेव प्रथममलङ्करणमिति सर्वाभिः स्त्रीभिः स्वर्णादीनामलङ्काराः परित्यक्ताः।

(२९)

तस्मिन् ग्रामे नारीणामभ्युदयेन सह सार्वजनिकाभ्युत्थानं प्रत्यक्षमासीत् । तथा हि—तत्र गृहेषु पुराणपुरुषाणां प्रातःस्मरणीयदेवीनां च चरितगाथा ब्राह्ममुहूर्तादेव बालानां कृते गीयन्ते स्म। जीवन-प्रभाते एव बालका उच्चादर्शान् प्रति समुत्सुकीकृताः । कर्तव्यपालनेन, परोपकारेण, सत्पराक्रमेण च जनस्य महिमा प्रादुर्भवतीति कल्पनाभिः तेषां चित्त-संस्कारो जातः। अतस्ते महाजनानां पन्थानं स्वीकर्तुं समुद्यता बभूवुः। 'ध्रुव-प्रह्लाद-राम-कृष्णादयो बाल्यत एवोदात्तसङ्कल्पा आसन्। तेषां सङ्कल्पानां सत्यसन्धत्वेन कष्टमयमपि जीवनं हेलया ते यापयामासुः' इति महतां जीवने आधिभौतिकसुखानां प्रमुखस्थानं न विद्यते। पुरातनमहात्मनां जीवन-यात्रा क्वचित् कष्टमयी अपि तेषां गौरवाय आसीत्। सुखमयं जीवनं प्रायशः माहात्म्यहीनं भवति, ईदृशैः सद्विचारैः बालानां हृदये उच्चाकांक्षा नित्यमेव संवर्धिताः।

नवयुवका अपि युवतीनां ग्रामाभ्युदयोत्साहं विलोक्य स्वयमपि कर्मनिष्ठा बभूवुः। 'कान्तोपदेशस्तु सरसताप्रवृत्तत्वात् ग्राह्यो भवति युवकानाम्' इति स्वभावसिद्धम्। युवतीनां पारस्परिकसौहार्देन सुभाविता युवकानां चित्तवृत्तयः प्रतिवेशिनां कल्याणाधानायोन्मुखीकृताः।

कौमुद्या आगमात् पूर्वं तस्मिन् ग्रामे कलहानां बाहुल्य-

मासीत्। तत्र स्त्रियः वाक्कौशलस्य प्रदर्शनं पारस्परिकमालिदाने कुर्वन्त्यः न केवलं ग्रामदेवस्य हृदयविदारणमकुर्वन्, अपितु ताभिः प्रेरिता युवका असत्यमपि प्रतिवेशिनां दुर्वृत्तं निवेदयितुं व्यवहारमण्डपं गत्वा धनस्य, धर्मस्य कालस्य च सर्वथा हानिमकुर्वन्। अचिरादेव वैमनस्योपजाताः सर्वा विप्रतिपत्तयः स्वप्नवत् सर्वथा प्रनष्टाः।

(३०)

स्वकीये ग्रामे सुदामा यदा कदा समागत्य ग्रामपरिवर्तनमालोच्य विस्मितोऽभवत्। 'ग्रामस्याभ्युदयः कौमुद्याः सत्प्रयत्नेन संवृत्तः' इति विचारयन्नेव स यमुनाया वरदायिनीमनुकम्पां सस्मार। ननु देवी यमुना मम प्रार्थनानुसारं कौमुद्याः चित्तवृत्तिं सर्वथा परिवर्तितवती। अन्यथा कथमियं मथुराया भोगविलासान्वेषिणी रमणी अधुना ग्राम्यबालासु सोत्साहं रमते। ग्रामाभ्युदयेऽस्मिन् पुरुषाणां किञ्चिदपि कीर्तिर्न विद्यते। नारीणां कर्मण्यतया स्वर्गसदृशोऽयं ग्रामो विराजते। तथा हि—ग्रामे सर्वेषां गृहेषु समृद्धिः, मनःसु सौमनस्यं शान्तिश्च काचिदपूर्वैव प्रतीयते। पुरुषा अपि मया ग्रामस्य पुरुषोचिताभ्युदयकर्मसु नियोजनीयाः। नियुक्तोऽस्मि सान्दीपनिना गृहस्थानां कृतेऽभ्युदयनिःश्रेयस-पथ-प्रदर्शनाय। तर्हि ग्रामीणानां समक्षं सनातनगृहस्थाश्रमादर्शानां व्याख्यानमहं करिष्यामि।

तस्मिन्दिवसे सन्ध्याकाले सुदाम्नो व्याख्यानं श्रोतुं महान् जनसम्मर्दोऽभवत्। ग्रामवासिनां प्रशस्तिं प्रथमं

प्रस्तावयन् सुदामा प्राह—भवतां परिश्रमैः शस्यश्यामलाया धरित्र्या मातृत्वं प्रसाधितम्। अस्मादृशानामृषिकल्पाचार्याणां जीवन-सौख्यं भवतामुत्पादितवस्तुभिः संसाध्यते। संन्यासिभ्यो विद्यार्थिभ्यश्च भोजन-वसनादीनि भवद्भिरेव दीयन्ते। नागरिकाणां सभ्यता भवतां परिश्रमाद्विना नास्ति लेशमात्रमपि सम्भावनीया। तेषां कृते घृतदुग्धान्नफलादीनि भवद्भिरेवोत्पाद्यन्ते। अतीव कृतज्ञोऽस्मि भवतां परोपकारवृत्त्या शिक्षितोऽस्मि स्वयमपि किञ्चिदुपकर्त्तुम्। महानुभावाः सर्वे भारतीयकृषकाः। तपस्विन इमे कृषीवलाः। अभिमानपरिग्रहविलासादिभिः विनिर्मुक्तं स्वर्गीयं तेषां चरितम्। अजानन्तोऽपि महागुणशालिन इमे गृहस्था ग्रामीणाः। तथापि किञ्चित् वक्तुकामोऽस्मि भवतां विज्ञानाय, आध्यात्मिकविकासाय च। पश्याम्यहं नितरां शोकाप्लुत एव यद्भवन्तो भारतीयजीवनस्य सौष्ठवपूर्णमर्यादामज्ञानवशादेव न परिपालयन्ति। मानव-जीवनस्यार्षपद्धतिं विवेचयन् आदिमनुः शिक्षितवान्—

यस्मात् त्रयोऽप्याश्रमिणो ज्ञानेनान्नेन चान्वहम्।
गृहस्थेनैव धार्यन्ते तस्माज्ज्येष्ठाश्रमो गृही॥

भवन्त इदानीं केवलमन्नेन समाजस्य धारणं कुर्वन्ति न तु ज्ञानेन। तर्हि भवन्तः किञ्चिन्न्यूनतरं गृहस्थधर्मं पालयन्ति। मनुः गृहस्थधर्मं प्रकाशयन् प्राह—

अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्॥

